बृहज्जातक श्रीगणेशाय नमः॥श्रीयोगेश्वरीभैरवाभ्यां नमः॥मूर्तित्वेपरिकल्पितः शशभृतोवर्त्मापुन
र्जन्मनामात्मेत्यात्मविदांक्रतुश्चयजतांभर्तामरज्योतिषां लोकानांप्रलयोद्भवस्थितिवि
१ भुश्चानेकधायःश्रुतौ॥वाचंनःसदधात्वनेककिरणस्त्रैलोक्यदीपोरविः॥१॥भूयोभिः
पटुबुद्धिभिःपटुधियांहोराफलज्ञप्तये शब्दन्यायसमन्वितेषुबहुशःशास्त्रेषुदृष्टेष्व
पि॥होरातंत्रमहार्णवप्रतरणेभग्नोद्यमानामहंस्वल्पंवृत्तविचित्रमर्थबहुलंशास्त्र
प्लवंप्रारभे॥२॥होरेत्यहोरात्रविकल्पमेके वांछंतिपूर्वापरवर्णलोपात्॥कर्मार्जि रामः
तंपूर्वभवेसदादियत्तस्यपक्तिंसमभिव्यनक्ति॥३॥कालांगानिवरांगमानन १
मुरोहृत्क्रोडवासोभृतोवस्तिर्व्यंजनमूरुजानुयुगुल्फेजंघेततोंघ्रिद्वयं॥मेषा
श्विप्रथमानवर्क्षचरणाश्चक्रस्थिताराशयोराशिक्षेत्रगृहर्क्षभानिभवनंचैका
र्थसंप्रत्ययाः॥ ४ ॥मत्स्यौघटीनृमिथुनंसगदंसवीणंचापीनरोश्वजघ

नोमकरोमृगास्यः॥तौलीससस्यदहनाप्लवगाचकन्याशेषाःस्वनामसदृशाःस्वचराश्च
सर्वे॥५॥क्षितिजसितज्ञचंद्ररविसौम्यसितावनिजाःसुरगुरुमंदसौरिगुरवश्चगृ
हांशकपाः॥अजमृगतौलिचंद्रभवनादिनवांशविधिर्भवनसमांशकाधिपतयः
स्वगृहात्क्रमशः॥ ६ ॥कुजरविजगुरुज्ञशुक्रभागाःपवनसमीरणकौर्प्यजूककले
याः॥अयुजियुजितुतेविपर्ययस्थाःशशिभवनालिझषांतमृक्षसंधिः॥ ७ ॥क्रि
यतावुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः॥तौक्षिकआकोकेरोहृद्रो
गश्चांत्यभंचेत्थं॥ ८ ॥द्रेक्काणहोरानवभागसंज्ञास्त्रिंशांशकद्वादशसंज्ञिताश्च॥
क्षेत्रंचयद्यस्यसतस्यवर्गोहोरेतिलग्नंभवनस्यचार्द्धं॥९॥गोजाश्विकर्किमिथु
नाःसमृगानिशाख्याःपृष्ठोदयाविमिथुनाःकथितास्तएव॥शीर्षोदयादिन
बलाश्चभवंतिशेषालग्नंसमेत्स्वशुभयतःपृथुरोमयुग्मं॥ १० ॥क्रूरःसौम्यःपु
रुषवनितेतेचरागद्विदेहाःप्रागादीशाःक्रियवृषनृयुक्कर्कटाःसत्रिकोणाः॥

बृहज्जातक मार्तंडेंदोरयुजि समभे चंद्रभान्वोश्च होरे द्रेक्काणाः स्युः स्वभवनसुतत्रित्रिकोणा
२ धिपानां ॥ ११ ॥ केचित्तु होरां प्रथमां भपस्य वांछंति लाभाधिपतेर्द्वितीयां ॥ द्रे
क्काणसंज्ञामपि वर्णयंति स्वद्वादशैकादशराशिपानां ॥ १२ ॥ अजवृषभमृ
गांगनाकुलीरा झषवणिजौ च दिवाकरादितुंगाः ॥ दशशिखिमनुयुक्ति
थीं१५द्रियांशै५स्त्रिनवक२७विंशति२०भिस्तेस्तनीचाः ॥ १३ ॥ वर्गोत्तमाश्च श्च ५
रगृहादिषु पूर्वमध्यपर्यंतगाः शुभफला नवभागसंज्ञाः ॥ सिंहो वृषः
प्रथमषष्ठहयांगतौलिकुंभास्त्रिकोणभवनानि भवंति सूर्यात् ॥ १४ ॥ हो
स रादयः स्तनुकुटुंबसहोत्थबंधुपुत्रारिपत्निमरणानि सु[illegible]भास्पदायाः ॥ रि राम
फाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितगृहाणि न नित्यमे २
के ॥ १५ ॥ कल्यस्वविक्रमगृहप्रतिभाक्षतानि चित्तोत्थरंध्रगुरुमान

भवव्ययानि ॥ लग्नाच्चतुर्थनिधने चतुरस्रसंज्ञे द्यूनं च सप्तमगृहं दशमं स्वमाज्ञा ॥
१६ ॥ कंटककेंद्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानां ॥ तेषु यथाभि
हितेषु बलाढ्याः कीटनरांबुचराः पशवश्च ॥ १७ ॥ केंद्रात्परं पणफरं परत
स्तु सर्वमापोक्लिमं हिबुकमंबु सुखं च वेश्म ॥ जामित्रमस्तभवनं सुतभं त्रिको
णं मेषूरणं दशममत्र च कर्म विद्यात् ॥ १८ ॥ होरा स्वामिगुरुज्ञवीक्षितयुता
नान्यैश्च वीर्योत्कटा केंद्रस्था द्विपदादयोह्नि निशि च प्राप्ते च संध्याद्वये ॥
पूर्वार्द्धे विषमादयः कृतगुणा मानं प्रतीपं च यत् दुश्चिक्यं सहजं तपश्च
नवमं त्र्याद्यं त्रिकोणं च तत् ॥ १९ ॥ रक्तः श्वेतः शुकतनुनिभः पाटलो धू
म्रपांडुश्चित्रः कृष्णः कनकसदृशः पिंगलः कर्बुरश्च ॥ बभ्रुः स्वच्छः प्र
थमभवनाद्येषु वर्णाः प्लवत्वं स्वाम्याशाख्यं दिनकरयुताद्भाद्द्वितीयं च वे

मिहरा

बृहज्जातक शि:॥२०॥इतिश्रीवाराहचार्यविरचितेबृहज्जातकेराशिप्रभेदाध्यायःप्रथमः॥ १ ॥
२ कालात्मादिनकृन्मनस्तुहिनगुःसत्वंकुजोज्ञोवचोजीवोज्ञानसुखेसितश्चमदनोदुः
खंदिनेशात्मजः॥राजानौरविशीतगूक्षितिसुतोनेताकुमारोबुधःसूरिर्दा
नवपूजितश्चसचिवौप्रेष्यःसहस्रांशुजः॥ १॥हेलिःसूर्यश्चंद्रमाःशीतरश्मिर्हेम्ना
विज्ञोबोधनश्चेंदुपुत्रः॥आरोवक्रःक्रूरदृक्चावनेयःकोणोमंदःसूर्यपुत्रोसितश्च
॥ २ ॥जीवोंगिराःसुरगुरुर्वचसांपतीज्यौशुक्रोभृगुर्भृगुसुतःसितआस्फुजि
च्च॥राहुस्तमोगुरुसुरश्चशिखीतिकेतुःपर्यायमन्यमुपलभ्यवदेच्चलोकात्॥ राम:
३॥रक्तश्यामोभास्करोगौरइंदुर्नात्युच्चांगोरक्तगौरश्चवक्रः॥दूर्वाश्यामोज्ञो २
गुरुर्गौरगात्रःश्यामःशुक्रोभास्करिःकृष्णदेहः॥ ४ ॥वर्णास्ताम्रसितातिर
क्तहरितव्यापीतचित्रासितावन्ह्यंबुक्षितिकेशवेंद्रशचिकाःसूर्यादिना

थाःक्रमात्॥प्रागाद्यारविशुक्रलोहिततमःसौरेंदुवित्सूरयःक्षीणेंदुर्कमहीसुता
र्कतनयाःपापाबुधस्तैर्युतः॥ ५॥बुधसूर्यसुतौनपुंसकाख्यौशशिशुक्रौयुवतीनर
श्चशेषाः॥शिखिभूखपयोमरुद्गणानांवशिनोभूमिसुतादयःक्रमेण॥ ६॥विप्रा
दितःशुक्रगुरूकुजार्कौशशीबुधश्चासितउत्तराणां॥चंद्रार्कजीवाज्ञसितौकुजार्कि
यथाक्रमंसत्वरजस्तमांसि॥ ७॥मधुपिंगलदृक्चतुरस्रतनुःपित्तप्रकृतिः
सविताल्पकचः॥तनुवृत्ततनुर्बहुवातकफःप्राज्ञश्चशशीमृदुवाक्शुभदृक्॥ ८
क्रूरदृक्तरुणमूर्तिरुदारःपैत्तिकःसुचपलःकृशमध्यः॥श्लिष्टवाक्सतत
हास्यरुचिर्ज्ञःपित्तमारुतकफप्रकृतिश्च॥ ९॥बृहत्तनुःपिंगलमूर्धजेक्षणोबृ
हस्पतिःश्रेष्ठमतिःकफात्मकः॥भृगुःसुखीकांतवपुःसुलोचनःकफानिला
त्मासितवक्रमूर्धजः॥ १०॥मंदोलसःकपिलदृक्कृशदीर्घगात्रःस्थूलद्वि

जः परः परमनीचकर्कचौनिलात्मा ॥ स्वात्यस्त्र्यस्य सुहृत्कुलीरमृगयः शुक्रस्य वा सा समज्ञा मंदार्कयोः
इंदुबुधशुक्रसूर्यजीवभौमाः ॥ ११ ॥ देवांबुवह्निविहारकोशशयनक्षित्युत्करेशाः क्र
माद्वस्त्रं स्थूलमभुक्तमग्निकहतं ममध्यं दृढं पाटितं ॥ ताम्रं स्यान्मणिहेमयुक्ति
रजतान्यर्काच्च मुक्तायसी द्रेक्काणैः शिशिरादयः शशिसुतश्चेन्द्वादिषु वृत्सरा ॥
॥ १२ ॥ त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयंतिचरणाभिवृद्धितः ॥ रविजा
मरेज्यरुधिराः परेन्वयेक्रमशोभवंतिकिलवीक्षणेधिकाः ॥ १३ ॥ अयनक्षण
वासरर्तवो मासोर्धं च समाश्च भास्करात् ॥ कटुकलवणतिक्तमिश्रिता मधुराम्लौ
च कषाय इत्यपि ॥ १४ ॥ जीवो जीवबुधौ सितेंदुतनयौ व्यर्का विभौमाः क्रमाद्वी
न्द्वर्का विकुजेंदिनाश्च सुहृदः केषांचिदेवं मतं ॥ सत्योक्ते सुहृदस्त्रिकोणभवनात्स्व
स्थान्त्यधीधर्मपाः स्वोच्चायुः सुखपाः स्वलक्षणविधेर्नान्यैर्विरोधादिति ॥ १५ ॥ रामः
४

शत्रू मंदसितौ समश्च शशिजो मित्राणि शेषा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ
शेषाः समाः शीतगोः ॥ जीवेंदूष्णकराः कुजस्य सुहृदो ज्ञोरिः सितार्कीसमौ मित्रे
सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ॥ १६ ॥ सूरेः सौम्यसितावरी रविसुतो
मध्योपरे त्वन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी ॥ शुक्र
ज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येरयो ये प्रोक्ताः स्वत्रिकोणभादिषु पुनस्ते
मीमयाकीर्तिताः ॥ १७ ॥ अन्योन्यस्य धनव्ययायसहजव्यापारबंधुस्थितास्त
त्काले सुहृदः स्वमतुंगभवनेप्येकेरयस्त्वन्यथा द्व्येकानुक्तभपान्सुहृत्समरिपू
न्संचिंत्य नैसर्गिकान्तत्काले च पुनस्तु तानधिसुहृन्मित्रादिभिः कल्पयेत् ॥ १८
स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानबलं स्वगृहोपगतैश्च ॥ दिक्षु बुधांगिरसौ र
विभौमौ सूर्यसुतः सितशीतकरौ च ॥ १९ ॥ उदगयने रविशीतमयूखौ वक्र
समागमगाः परिशेषाः ॥ विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परि

॥बृह०तक

५

कल्याः॥ २० ॥ निशि शशिकुजसौराः सर्वदा ज्ञोह्नि चान्ये बहुलसितगताः स्युः क्रू
रसौम्याः क्रमेण॥ द्व्ययनदिवसहोरामासपैः कालवीर्यं शकुबुगुशुचसाद्या वृद्धि
तो वीर्यतः॥ २१ ॥ इति श्रीवराहमिहिराचार्यविरचिते बृहज्जातके ग्रहयोनिप्रभे रा२
दाध्यायो द्वितीयः॥ २ ॥ क्रूरग्रहैः सुबलिभिर्विबलैश्च सौम्यैः क्लीबे चतुष्ट
यगते तदवेक्षणाद्वा॥ चंद्रोपगद्विरसभागसमानरूपं सत्वं वदेद्यदि भवेत्स वि
योनिसंज्ञः॥ १॥ पापा बलिनः स्वभागगाः पारक्ये विबलाश्च शोभनाः॥ लग्नं च
वियोनिसंज्ञकं दृष्ट्वात्रापि वियोनिमादिशेत्॥ २ ॥ क्रियः शिरो वक्त्रगले वृ रामः॥
षोन्ये पादांसकं पृष्ठमुरोथ पार्श्वे॥ कुक्षिस्त्वपानोंघ्रथ मेढ्रमुष्कौ स्फिक् पुच्छमि ५
त्याह चतुष्पदांगे॥ ३ ॥ लग्नांशकाद्ग्रहयोगेक्षणाद्वा वर्णान्वदेद्बलयु
क्ताद्वियोनौ॥ दृष्ट्या समानान्प्रवदेत्स्वसंख्यया रेखां वदेत्स्मरसंस्थैश्च पृष्ठे॥ ४॥

खगे दृकाणे बलसंयुते न वा ग्रहेण युक्ते चरभांशकोदये॥ बुधांशके वा विहगाः स्थलांबुजाः
शनैश्चरेंद्वीक्षणयोगसंभवात्॥ ५ ॥ होरेंदुसूरिरविभिर्विबलैस्तरूणां तोये स्थले
रूहभवांशकृतः प्रभेदः॥ लग्नाद्ग्रहः स्थलजलर्क्षपतिस्तु यावांस्तावंत एव तरवः स्थ
लतोयजाताः॥ ६ ॥ अंतःसारान्जनयति रविर्दुर्भगान्सूर्यसूनुः क्षीरोपेतांस्तु
हिनकिरणः कंटकाढ्यांश्च भौमः॥ वागीशज्ञौ सफलविफलान्पुष्पवृक्षांश्च शुक्रः
स्निग्धानिंदुः कटुकविटपान्भूमिपुत्रश्च भूयः॥ ७ ॥ शुभोऽशुभर्क्षे रुचिरं
कुभूमिजं करोति वृक्षं विपरीतमन्यथा॥ परांशके यावति विच्युतः स्वभाद्भवंति
तुल्यास्तरवस्तथाविधाः॥ ८ ॥ इति श्रीवराहमिहिराचार्यविरचिते बृहज्जातके वि रा३
योनिजन्माध्यायस्तृतीयः॥ ३ ॥ कुजेंदुहेतुप्रतिमासमार्तवं गते तु पीडर्क्ष
मनुष्णदीधितौ॥ अतोन्यथास्थे शुभपुंग्रहेक्षिते नरेण संयोगमुपैति कामिनी॥ १॥

॥बृह०तक

६ २२

यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुनप्रयोगः ॥ असद्ग्रहालोकितसंयुतेस्ते
सरोषईष्टैः सविलासहासः ॥ २ ॥ रवींदुशुक्रावनिजैः स्वभागगे गुरौ त्रिकोणोदय
संस्थितेपि वा ॥ भवत्यपत्यं हि विबीजिनामिमे करा हिमांशोर्विदृशामिवाफलाः ॥ ३ ॥
दिवाकरेंद्वोः स्मरगौ कुजार्कजौ गदप्रदौ पुंगलयोषितोस्तदा ॥ व्ययस्वगौ मृत्युकरौ
युतौ तथा तदेकदृष्ट्या मरणाय कल्पितौ ॥ ४ ॥ दिवार्कशुक्रौ पितृमातृसंज्ञितौ शनै
श्चरेंदु निशि तद्विपर्ययात् ॥ पितृव्यमातृष्वसृसंज्ञितौ तावथौजयुग्मर्क्षगतौ तयोः
शुभौ ॥ ५ ॥ अभिलषद्भिरुदयर्क्षमसद्भिर्मरणमेति शुभदृष्टिमयाते ॥ उदयरा रामः
शिसहिते च यमे स्त्री विगलितोडुपतिभूसुतदृष्टे ॥ ६ ॥ पापद्वयमध्यसंस्थितौ ६
लग्नेंदू न च सौम्यवीक्षितौ ॥ युगपत्पृथगेव वा वदेन्नारीगर्भयुता विपद्यते ॥ ७ ॥
क्रूरे शशिनश्चतुर्थगे लग्नाद्वा निधनाश्रिते कुजे ॥ बंधंत्यगयोः कुजार्कयोः
क्षीणेंदौ निधनाय पूर्ववत् ॥ ८ ॥ उदयास्तयोः कुजार्कयोर्निधनं शस्त्रकृतं व

देत्तदा ॥ मासाधिपतौ निपीडिते तत्कालं स्रवणं समादिशेत् ॥ ९ ॥ शशांकलग्नोपगतैः शुभ
ग्रहैस्त्रिकोणजायार्थसुखास्पदस्थितैः ॥ तृतीयलाभर्क्षगतैश्च पापकैः सुखी तु गर्भो र
विणा निरीक्षितः ॥ १० ॥ ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विंदुभिः पुंजन्म प्रवदेत्स
मांशकगतैर्युग्मेषु तैर्योषितः ॥ गुर्वर्कौ विषमे नरं शशिसितौ वक्रश्च युग्मे स्त्रियं द्व्यंगस्था
बुधवीक्षणाच्च यमलौ कुर्वंति पक्षे स्वके ॥ ११ ॥ विहाय लग्नं विषमर्क्षसंस्थः सौरोपि पुंजन्म
करो विलग्नात् ॥ प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यः प्रसूतौ पुरुषोंगना वा ॥ १२ ॥ [illegible]
[illegible] ॥ अन्योन्यं यदि पश्यतः शशिरवी यद्यार्किसौम्यावपि वक्रो वा समगं दिनेश
मसमे चंद्रोदयौ चेत्स्थितौ युग्मौजर्क्षगतावपींदुशशिजौ भूम्यात्मजेनेक्षितौ पुंभागे
सितलग्नशीतकिरणाः स्युः क्लीबयोगाः स्मृताः ॥ १३ ॥ युग्मे चंद्रसितौ तथौजभवने
स्युर्ज्ञारजीवोदया लग्नेंदू नृनिरीक्षितौ च समगौ युग्मेषु वा प्राणिनः ॥ कुर्युस्ते मिथुनं

॥बृह०तक ७

ग्रहोदयगतान्द्वंगांशकान्पश्यति स्वांशेद्रेत्रितये ह्रतांगांशकवशा युग्मं त्वमिश्रैः समं ॥
॥१४॥ धनुर्धरस्यांशगते विलग्ने ग्रहैस्तदंशोपगतैर्बलिष्ठैः ॥ ज्ञेनार्किणा वीर्ययुतेन दृष्टे सं
तित्रभूताऽअपि कोशसंस्थाः ॥ १५ ॥ कललघनांकुरास्थिचर्मांगजचेतनताः सितकु
जजीवसूर्यचंद्रार्किबुधाः परतः ॥ उदयचंद्रसूर्यनाथाः क्रमशो गदिता भवति शुभा
शुभं च मासाधिपतेः सदृशं ॥ १६ ॥ त्रिकोणगे ज्ञे विबलैस्तथापरैर्मुखांघ्रिहस्तैर्द्विगु
णैस्तथा भवेत् ॥ अवाग्गवीदावशुभैर्भसंधिगैः शुभेक्षितश्चेत्कुरुते जिरं चिरात् ॥ रामः ७
॥ १७ ॥ सौम्यर्क्षांशे रविजरुधिरौ चेत्सदंतोत्र जातः कुब्जः स्वर्क्षे शशिनि तनुगे मं
दमाहेयदृष्टे ॥ पंगुर्मीने यमशशिकुजैर्वीक्षिते लग्नसंस्थे संधौ पापैः शशिनि च
जडः स्यान्न चेत्सौम्यदृष्टः ॥ १८ ॥ सौरशशांकदिवाकरदृष्टे वामनको मकरां
त्यविलग्ने ॥ धीनवमोदयगैश्च दृकाणैः पापयुतैरभुजांघ्रिशिरः स्यात् ॥ १९ ॥

रविशशियुते सिंहे लग्ने कुजार्किनिरीक्षिते नयनरहितः सौम्यासौम्यैः सबुद्बुदलोचनः ॥
व्ययगृहगतश्चंद्रो वामं हिनस्त्यपरं रविर्न शुभगदिता योगा याम्या भवंति शुभेक्षिताः ॥
॥ २० ॥ तत्कालमिंदुसहितो द्विरसांशको यस्तत्तुल्यराशिसहिते पुरतः शशांके ॥ या
वानुदेति दिनरात्रसमानभागस्तावद्गते दिननिशोः प्रवदंति जन्म ॥ २१ ॥ उदयति मृ
दुभांशे सप्तमस्थे च मंदे यदि भवति निषेकः सूतिरब्दत्रयेण ॥ शशिनि तु विधिरेषो
द्वादशेब्देत्र कुर्यान्निगदितमिह चिंत्यं सूतिकालेपि युक्त्या ॥ २२ ॥ इति श्रीवरा
हमिहिराचार्यविरचिते बृहज्जातके निषेकाध्यायश्चतुर्थः ॥ ४ ॥ पितुर्जातः
परोक्षस्य लग्नमिंदावपश्यति ॥ विदेशस्थस्य चरभे मध्याद्भ्रष्टे दिवाकरे ॥ १ ॥
उदयस्थेपि वा मंदे कुजे वास्तं समागते ॥ स्थिते चांतः क्षपानाथे शशांकसुतशु
क्रयोः ॥ २ ॥ शशांके पापलग्ने वा वृश्चिकेशत्रिभागगे ॥ शुभैः स्वायस्थिते जातः

॥बृह०जा०
९

सर्पस्तदावेष्टितोपिवा॥३ ॥चतुष्पदगतेभानौशेषैर्वीर्यसमन्वितैः॥द्वितनुस्थैश्चयमलौभ
वतःकोशवेष्टितौ॥छागसिंहवृषैर्लग्नेतत्स्थेसौरेथवाकुजे॥राश्यंशसदृशेगात्रेजायते ना
लवेष्टितः॥५ ॥नलग्नमिंदुंचगुरुर्निरीक्षितेनवाशशांकंरविणासमागतं॥सपापको
र्केणयुतोथवाशशीपरेणजातंप्रवदंतिनिश्चयात्॥६॥क्रूरर्क्षगतावशोभनौसूर्याद्यून
नवात्मजस्थितौ॥बद्धस्तुपिताविदेशगःस्वेवाराशिवशा दथोपथि॥७ ॥पूर्णेशशि
निस्वराशिगेसौम्येलग्नगतेशुभेसुखे॥लग्नेजलजेस्तगेपिवाचंद्रेपोतगताप्रसूयते रामः५
॥८ ॥आप्योदयमाप्तगःशशीसंपूर्णःसमवेक्षतेथवा॥मेषूरणबंधुलग्नगःस्यात्सूतिः ९
सलिलेनसंशयः॥९ ॥उदयोडुपयोर्व्ययस्थितेगुप्त्यांपापनिरीक्षितेयुते॥अलिकर्कि
युतेविलग्नगेसौरेशीतकरेक्षितेवटे॥१० ॥मंदेब्जगतेविलग्नगेबुधसूर्येंदुनिरीक्षि
तेक्रमात्॥क्रीडाभवनेसुरालयेसोषरभूमिषुचप्रसूयते॥११ ॥नृलग्नगेप्रेक्ष्यकुजः
स्मशानेरम्येसितेंदुगुरुरग्निहोत्रे॥रविर्नरेंद्रामरगोकुलेषुशिल्प्यालयेज्ञःप्रसवंकरो

ग

ति॥१२॥राश्यंशसमानगोचरेमार्गेजन्मचरेस्थिरेगृहे॥स्वर्क्षांशगतेस्वमंदिरेबलयोगा
त्फलमंशकर्क्षयोः॥१३॥आरार्कजयोस्त्रिकोणगेचंद्रेस्तेचविसृज्यतेंबया॥दृष्टेमर
राजमंत्रिणादीर्घायुःसुखभाक्चसःस्मृतः॥१४ ॥पापेक्षितेतुहिनगावुदयेकुजेस्ते
त्यक्तोविनश्यतिकुजार्कजयोस्तथाये॥सौम्येपिपश्यतितथाविधहस्तमेतिसौम्येतरे
षुपरहस्तगतोप्यनायुः॥१५ ॥पितृमातृगृहेषुतद्बलात्तरुकोशालादिषुनीचगैःशुभैः
॥यदिनैकगतैस्तुवीक्षितौलग्नेंदूविजनेप्रसूयते॥१६ ॥मंदर्क्षांशेशशिनिहिबुकेम
ददृष्टेब्जगेवातद्युक्तेवातमसिशयनंनीचसंस्थैश्चभूमौ॥यद्वद्राशिर्व्रजतिह
रिणंगर्भमोक्षस्तुतद्वत्पापैश्चंद्रस्मरसुखगतैःक्लेशमाहुर्जनन्याः॥१७ ॥स्नेहःश
शांकादुदयाच्चवर्तिर्दीपोर्कयुक्तर्क्षवशाच्चराद्यः॥द्वारंचतद्वास्तुनिकेंद्रसंस्थैर्ज्ञेयंग्र
हैर्वीर्यसमन्वितैर्वा॥१८ ॥जीर्णंसंस्कृतमर्कजेक्षितिसुतेदग्धंनवंशीतगौ
काष्ठाढ्यंनदृढंरवौशशिसुतेतन्नैकशिल्प्युद्भवं॥रम्यंचित्रयुतंनवंचभृगुजे

॥बृह॰जा॰ जीवेंदृक्के मंदिरं चक्रे स्थितैः स्वयथोपदेशरचनां सामंतपूर्वां वदेत् ॥१९॥ मेषकुलीरतुला
९ लिघटैः प्रागुत्तरतो गुरुसौम्यगृहेषु ॥ पश्चिमतश्च वृषेण निवासो दक्षिणभागकरौ मृग
सिंहौ ॥२०॥ प्राच्यादि गृहे क्रियादयो द्वौ द्वौ कोणगता द्विमूर्तयः ॥ शय्यास्वपि वास्तु
वद्वदेत्पादैः षट्त्रिनवांत्यसंस्थितैः ॥२१॥ चंद्रलग्नांतरगैर्ग्रहैः स्युरुपसूतिकाः
॥ बहिरंतश्च चक्रार्धे दृश्यादृश्येन्यथा परे ॥२२॥ लग्ननवांशपतुल्यतनुः स्याद्वीर्य
युतग्रहतुल्यतनुर्वा ॥ चंद्रसमेतनवांशपवर्णः कादिविलग्नविभक्तभगात्रः ॥२३॥ राम:॥
कं दृक्श्रोत्रनसाकपोलहनवो वक्त्रं च होरादयस्ते कंठांसकबाहुपार्श्वहृदयक्रोडानि ना ९
भिस्ततः ॥ बस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी जंघेऽघ्रीत्युभयत्र वाममुदि
तैर्द्रेष्काणभागैस्त्रिधा ॥२४॥ तस्मिन्पापयुते व्रणः शुभयुते दृष्टेन लक्ष्मादिशेत्स्व
क्षांशे स्थिरसंयुतेषु सहजः स्यादन्यथागंतुकः ॥ मंदेश्मानिलजोऽग्निशस्त्रवि

षजो भौमे बुधे भूभुवः सूर्ये काष्ठचतुष्पदेषु हिमगौ शृंग्यब्जजोऽन्यैः शुभं ॥२५॥ समनुपतिता यस्मि
न्भागे त्रयः सबुधा ग्रहा भवति नियमात्तस्यावाप्तिः शुभेष्वशुभेषु वा ॥ व्रणकृदशुभः षष्ठे देहे त
नोर्भसमाश्रिते तिलकमसकृद्दृष्टः सौम्यैर्युतश्च सलक्ष्मवान् ॥२६॥ इति श्रीवराहमिहिराचा रा
यो ५ र्यविरचिते बृहज्जातके जन्मविधिर्नामाध्यायः पंचमः ॥ ५ ॥ अथारिष्टाध्यायो व्याख्याय
ते संध्यायां हिमदीधितिहोरापापैर्भांतगैर्निधनाय ॥ प्रत्येकं शशिपापसमेतैः केंद्रैर्वा स विनाशमु
क्रूरेषु ६+ पैति ॥१॥ चक्रस्य पूर्वापरभागगेषु सौम्येषु च कीटलग्ने ॥ क्षिप्रं विनाशं समुपैति जातः पा
पैर्विलग्नास्तमयाभितश्च ॥२॥ पापावुदयास्तगतौ क्रूरेण युतश्च शशी ॥ दृष्टश्च शुभै
र्न यदा मृत्युश्च भवेदचिरात् ॥३॥ क्षीणे हिमगौ व्ययगे पापैरुदयाष्टमगैः ॥ केंद्रेषु शुभा
श्च न चेत्क्षिप्रं निधनं प्रवदेत् ॥४॥ क्रूरसंयुतः शशी स्मरांत्यमृत्युलग्नगः ॥ कंटकाद्ब
हिः शुभैरवीक्षितश्च मृत्युदः ॥५॥ शशिन्यरिविनाशगे निधनमाशु पापेक्षिते शुभै
रथ समाष्टकं दलमतश्च मिश्रैः स्थितिः ॥ असद्भिरवलोकिते बलिभिरत्र मासं शुभे

बृह०जातक कलत्रसहितेचपापविजितेविलग्नाधिपे ॥ ६ ॥ लग्नेक्षीणेशशिनिनिधनरंध्रकेंद्रेषुपापैःपापां
१ तस्थेनिधनहिबुकद्यूनयुक्तेचचंद्रे ॥ एवंलग्नेभवतिमदनच्छिद्रसंस्थेचपापेमात्रासार्धंयदि
चनशुभैर्वीक्षितःशक्तिभृद्भिः ॥ ७ ॥ राश्यंतगेसद्भिरवीक्ष्यमाणेचंद्रेत्रिकोणोपगतैश्च
पापैः ॥ प्राणैःप्रयात्याशुशिशुर्वियोगमस्तेचपापैस्तुहिनांशुलग्ने ॥ ८ ॥ अशुभ
सहितेग्रस्तेचंद्रेकुजेनिधनाश्रितेजननिसुतयोर्मृत्युर्लग्नेरवौतुसशस्त्रजः ॥ उद
यतिरवौशीतांशौवात्रिकोणविनाशगतैर्निधनमशुभैर्नयुतेक्षिते ॥ ९ ॥ असित वीर्योपेतैः
रविशशांककुभूमिजैर्व्ययनवमोदयनैधनाश्रितैः ॥ भवतिमरणमाशुदेहिनांयदिब रामः॥ शुभे
लिनागुरुणानवीक्षितः ॥ १० ॥ सुतमदननवांत्यलग्नरंध्रेष्वशुभयुतोमरणायशीत ९
रश्मिः ॥ भृगुसुतशशिपुत्रदेवपूज्यैर्यदिबलिभिर्नयुतोवलोकितोवा ॥ ११ ॥ योगे
स्थानंगतवतिबलिनश्चंद्रेस्वंवातनुगृहमथवा ॥ पापैर्दृष्टेबलवतिमरणंवर्षस्यांतेकि
लमुनिगदितं ॥ १२ ॥ इतिश्रीवराहमिहिराचार्यविरचितेबृहज्जातकेरिष्टाध्यायःषष्ठः ॥ ६ ॥

रा

मययवनमणित्थशक्तिपूर्वैर्दिवसकरादिषुवत्सराःप्रदिष्टाः ॥ नवतिथिविषयाश्विभूत
रुद्रदशसहितादशभिःस्वतुंगभेषु ॥ १ ॥ नीचेतोर्धंह्रसतिहिततश्चांतरस्थेनुपातोहोरा
त्वंशप्रतिममपरेराशितुल्यंवदंति ॥ हित्वावक्रंरिपुगृहगतैर्हीयतेस्वत्रिभागःसूर्यो
च्छिन्नद्युतिषुचदलंप्रोह्यशुक्रार्कपुत्रौ ॥ २ ॥ सर्वार्द्धत्रिचरणपंचषष्ठभागाःक्षी
यंतेव्ययभवनादसत्सुवामं ॥ सत्स्वर्द्धंह्रसतितथैकराशिगानामेकांशं[illegible]हर
तिबलीतथाहसत्यः ॥ ३ ॥ सार्द्धोदितोदितनवांशहतात्समस्ताद्भागोष्टयुक्श
तसंख्यमुपैतिनाशं ॥ क्रूरेविलग्नसहितेविधिनात्वनेनसौम्येक्षितेदलमतःप्रल वि४
यंप्रयाति ॥ ४ ॥ समाःषष्टिर्द्विघ्नामनुजकरिणांपंचचनिशाहयानांद्वात्रिंशन्नर
करभयोःपंचककृतिः ॥ विरूपासात्वायुर्वृषमहिषयोर्द्वादशशुनःस्मृतंछागा
दीनांदशकसहिताःषट्चपरमं ॥ ५ ॥ अनिमिषपरमांशकेविलग्नेशशितन

बृ०जा०क येगविपंचवर्गलिप्ते॥भवतिहिपरमायुषःप्रमाणंयदिसकलासहिताःस्वतुंगभेषु॥६॥
११ आयुर्दायंविष्णुगुप्तोपिचैवंदेवस्वामीसिद्धसेनश्चचक्रे॥दोषश्चैषांजायतेष्टावरिष्टं
२३ हित्वानायुर्विंशतेःस्यादधस्तात्॥७॥यस्मीन्योगेपूर्णमायुःप्रदिष्टंतस्मिन्प्रोक्तं
चक्रवर्तित्वमन्यैः॥प्रत्यक्षोयंतेषुदोषोपरोपिजीवंत्यायुःपूर्णमर्थैर्विनापि॥८॥
स्वमतेनकिलाहजीवशर्माग्रहदायंपरमायुषःस्वराशिं॥ग्रहभुक्तनवांशराशि
तुल्यंवहुसाम्यंसमुपैतिसत्यवाक्यं॥९॥सत्योक्तेग्रहमिष्टंलिप्तीकृत्वाशता राम:
तद्येनाप्तं॥मंडलभागविशुद्धेब्दाःस्युःशेषात्तुमासाद्याः॥१०॥स्वतुंगवक्रो ११
पगतैस्त्रिसंगुणंद्विरुत्तमस्वांशकभात्रिभागकैः॥इयान्विशेषस्तुभदत्तभाषि
तेसमानमन्यत्प्रथमेप्युदीरितं॥११॥किंत्वत्रभांशप्रतिमंददातिवीर्यान्विता
राशिसमंचहोरा॥क्रूरोदयेयोपचयेसनात्रकार्यंचनांशैःप्रथमोपदिष्टैः॥१२॥

सत्योपदेशोवरमात्रकिंतुकुर्वंत्ययोग्यंबहुवर्गणाभिः॥आचार्यकत्वंहिवहुघ्नतायामेकं
तुयद्भूरितदेवकार्यं॥१३॥गुरुशशिसहितेकुलीरलग्नेशशितनयेभृगुजेचकेंद्रयाते
॥भवरिपुसहजोपगेश्चशेषैरमितमिहायुरनुक्रमाद्विनास्यात्॥१४॥ इतिश्री
वराहमिहिराचार्यविरचितेबृहज्जातकेआयुर्दायाध्यायःसप्तमः॥७॥उदयरविश
शांकप्राणिकेंद्रादिसंस्थाःप्रथमवयसिमध्येंत्येचदद्युःफलानि॥नहिनफलविपाकः
केंद्रसंस्थाद्यभावेभवतिहिफलपंक्तिःपूर्वमापोक्लिमेपि॥१॥आयुःकृतंयेनहि
यत्तदेवकल्प्यादशासाप्रबलस्यपूर्वा॥साम्येबहूनांवहुवर्षदस्यतेषांचसाम्येप्रथ
मोदितस्य॥२॥एकर्क्षगोर्द्धमपहृत्यददातितुस्वं।त्र्यंशंत्रिकोणगृहगःस्मरगःस्व
रांशं॥पादंफलस्यचतुरस्रगतःसहोरास्त्वेवंपरस्परगताःपरिपाचयंति॥३॥स्था
नान्यथैतानिसवर्णयित्वासर्वाण्यधश्छेदविवर्जितानि॥दशाब्दपिंडेगुणकायथांशं

॥वृह०जा०के छेदस्तदैक्येन दशाप्रभेदः॥ ४ ॥सम्यग्बलिनः स्वतुंगभागे संपूर्णा बलवर्जितस्य रिक्ता॥
१२ नीचांशगतस्य शत्रुभागे ज्ञेयानिष्टफला दशा प्रसूतौ॥ ५ ॥भ्रष्टस्य तुंगादवरोहिसं
ज्ञा मध्या भवेत्सा सुहृदुच्चभागे॥ आरोहिणी निम्नपरिच्युतस्य नीचारिभांशेष्वध
मा भवेत्सा॥ ६ ॥नीचारिभांशे समवस्थितस्य शस्ते गृहे मिश्रफला प्रदिष्टा॥ संज्ञा
नुरूपाणि फलान्यथैषां दशासु वक्ष्यामि फलोपयोगं॥ ७ ॥ उभयेधममध्यपूजिता
द्रेष्काणेश्वरभेषु चोत्क्रमात्॥ अशुभेष्टसमाः स्थिरे क्रमाद्धोराद्याः परिकल्पिता रामः॥
दशासा॥ ८ ॥एकं १ द्वे २ नव ९ विंशति २० धृति १८ कृती २० पंचाशदेषां क्र १२
माच्चंद्रारेंदुजशुक्रजीवदिनकृद्दैवाकरीणां समाः॥ स्वैः स्वैः पुष्टफलानि सर्गज
ननितैः पंक्तिर्दशायाः क्रमाद्दंते लग्नदशा शुभेति यवना नेच्छंति केचित्तथा॥ ९ ॥
पाकस्वामिनि लग्नगे सुहृदि वा वर्गेस्य सौम्येपि वा॥ प्रारब्धा शुभदा दशा त्रिदशष

ड्लाभेषु वा पाकपे॥ मित्रोच्चोपचयेषु त्रिकोणमदने पाकेश्वरस्य स्थितश्चंद्रः सत्फलबोध
नानि कुरुते पापानि चातोन्यथा॥ १० ॥प्रारब्धा हिमगौ दशा स्वगृहे मानार्थसौख्या
वहा कौजे दृष्यति स्त्रियं बुधगृहे विद्यासुहृद्वित्तदा॥ दुर्गारण्यपथालये कृषिकरी सिंहे सि
तर्क्षे न्नदा कुल्यादा मृगकुंभयोर्गुरुगृहे मानार्थसौख्यावहा॥ ११ ॥सौर्ये स्वं नखदंतचर्म
कनककौर्याध्वभूपाहवैस्तैक्ष्ण्यं धैर्यमजस्रमुद्यमरतिः ख्यातः प्रतापोन्नतः॥ भार्यापुत्रध
नारिशस्त्रहुतभुग्भूपोद्भवा व्यापदस्त्यागी पापरतिः स्वभृत्यकलहो हृत्क्रोडपीडामयाः
॥ १२ ॥इंदोः प्राप्य दशां फलानि लभते मंत्रद्विजात्युद्भवानीक्षुक्षीरविकारवस्त्रकुसुमक्री
डातिलान्नश्रमैः॥ निद्रालस्यमृदुद्विजामररतिः स्त्रीजन्ममेधावितां कीर्त्यर्थोपचयक्षयौ
च बलिभिर्वैरं स्वपक्षेण च॥ १३ ॥भौमस्यारिविमर्दभूपसहजक्षित्याविकाजैर्धनं प्रद्वेषः सु
तमित्रदारसहजैर्विद्वद्गुरुद्वेषिता॥ तृष्णासृग्ज्वरपित्तभंगजनिरतारोगाः परस्त्रीकृताः

॥बृह०जा० प्रीतिः पापरतेरधर्मनिरतिः पारुष्यतैक्ष्ण्यानि च ॥ १४ ॥ बौधां दौत्यसुहृद्गुरुद्विजधनं विद्वत्प्रशंसा
१३ यशो युक्तिर्द्रव्यसुवर्णवेसरमहीसौभाग्यसौख्याप्तयः ॥ हास्योपासनकौशलं मतिचयो धर्म
क्रियासिद्धयः पारुष्यश्रमबंधमानसशुचः पीडा च दोषत्रयात् ॥ १५ ॥ जैव्यां मानगुणोदयो
मतिचयः कांतिः प्रतापोन्नतिर्माहात्म्योद्यममंत्रनीतिनृपतिस्वाध्यायमंत्रैर्धनं ॥ हेमाश्वा
त्मजकुंजरांबरचयः प्रीतिश्च सद्भूमिपैः सूक्ष्मोहागहनाश्रमः श्रवणरुग्वैरं विधर्माश्रितैः
॥ १६ ॥ शौक्र्यां गीतरतिः प्रमोदसुरभिद्रव्यान्नपानांबरस्त्रीरत्नद्युतिमन्मथोपकरणज्ञा
नेष्टमित्रागमः ॥ कौशल्यं क्रयविक्रये कृषिनिधिप्राप्तिर्धनस्यागमो वृंदौ वृद्धनिषादधर्मरहि रामः ॥
तैर्वैरं शुचस्नेहनः ॥ १७ ॥ सौरीं प्राप्य खरोष्ट्रपक्षिमहिषीवृद्धांगनावाप्तयः ॥ श्रेणीग्रामपु १३
राधिकारजनिता पूजा कुधान्यागमः ॥ श्लेष्मेर्ष्यानिलकोपमोहमलिनव्यापत्तितंद्रीश्र
माद्भुत्यापत्यकलत्रभर्त्सनमपि प्राप्नोति च व्यंगतां ॥ १८ ॥ दशासु शस्तासु शुभानि
कुर्वंत्यनिष्टसंज्ञास्वशुभानि चैव ॥ मिश्रासु मिश्राणि दशाफलानि होराफलं लग्नपतेः

समानं ॥ १९ ॥ संज्ञाध्याये यस्य यद्द्रव्यमुक्तं कर्माजीवो यश्च यस्योपदिष्टः ॥ भावस्थानालोकयो
गोद्भवं च तत्तत्सर्वं तस्य योज्यं दशायां ॥ २० ॥ छायां महाभूतकृतां च सर्वेभिव्यंजयंति स्व
दशामवाप्य ॥ क्ष्मांब्वग्निवाय्वंबरजान्गुणांश्च नासास्यदृक्त्वक्श्रवणानुमेयान् ॥ २१ ॥
शुभफलददशायां तादृगेवांतरात्मा बहु जनयति पुंसां सौख्यमर्थागमं च ॥ कथितफ
लविपाकैस्तर्कयेद्वर्तमानां परिणमति फलोक्तिः स्वप्नचिंतास्ववीर्यैः ॥ २२ ॥ एकग्रहस्य
सदृशे फलयोर्विरोधे नाशं वदेद्यदधिकं परिपच्यते तत् ॥ नान्योग्रहः सदृशमन्यफलं हि
नस्ति स्वां स्वां दशामुपगताः स्वफलप्रदाः स्युः ॥ २३ ॥ इति श्रीवराहमिहिराचार्यविरचिते
बृहज्जातके दशांतर्दशाध्यायोष्टमः ॥ ८ ॥ स्वादर्कः प्रथमायबंधुनिधनद्व्याज्ञात
पोद्यूनगो वक्रात्स्वाद्द्विवतद्वदेव रविजाच्छुक्रात्स्मरांत्यारिगः ॥ जीवाद्धर्मसुताय शत्रु
षु दृश्यायारिगः शत्रुगो रेफेवांत्यतपः सुतेषु च बुधात्क्ष्मार्कवद्धंत्यगः ॥ १ ॥ लग्नात्

बृह०जा० षट्त्रिदशायगः सधनधीधर्मेषु चाराच्छशी स्वात्सास्तादिषु साष्टसप्तसु रवेः षट्त्र्यायधीस्थो
१४ यमात्॥ धीत्र्यायाष्टमकंटकेषु शशिजाज्जीवाद्व्ययायाष्टगः केंद्रस्थश्च सितात्तु धर्मे
सुखधीत्र्यायास्पदानंगगः॥ २ ॥ वक्रस्तूपचयेष्विनात्सतनयेष्वाद्याधिकेषूदया
च्चंद्राद्दिग्विफलेषु केंद्रनिधनप्राप्त्यर्थगः स्वाच्छुभः॥ धर्मायाष्टमकेंद्रगोर्कतनयात्
ज्ञात्षट्त्रिधीलाभगः शुक्रात्षड्व्ययलाभमृत्युषु गुरोः कर्मांत्यलाभारिषु॥३॥
द्व्याद्यायाष्टतपःसुखेषु भृगुजात्स्वात्मजेष्विंदुजः साज्ञाज्ञेषु यमारयोर्व्ययरि रामः॥
पुप्राप्त्यष्टगो वाक्पतेः॥ धर्मायारिसुतव्ययेषु सवितुः स्वात्साद्यकर्मत्रिगः षट्स्वाया १४
ष्टसुखास्पदेषु हिमगोः साद्येषु लग्नाच्छुभः॥४॥ दिक्स्वाद्याष्टमदायबंधुषु कुजा
त्स्वात्सत्रिकेष्वंगिराः सूर्यात्सत्रिनवेषु धीस्वनवदिग्लाभारिगो भार्गवात्॥ जाया
यार्थनवात्मजेषु हिमगोर्मंदात्त्रिषड्धीव्यये दिग्धीषट्स्वसुखायपूर्वनवगो ज्ञात्सस

प्तोदयात्॥५॥ लग्नाद्व्यास्तलाभरंध्रनवमः सांत्यः शशांकात्सितः स्वात्साज्ञेषु सुखत्रि
धीनवदशाच्छिद्राप्तिगः सूर्यजात्॥ रंध्रायव्ययगो रवेर्नवदशप्राप्त्यष्टधीस्थो गुरोर्ज्ञाद्धीत्र्या
यनवारिगस्त्रिनवषट्पुत्रागमाप्त्यः कुजात्॥६॥ मंदः स्वात्त्रिसुतायशत्रुषु शुभः
साज्ञांत्यगो भूमिजात्केंद्रायाष्टधनेष्विनादुपचयेष्वाद्ये सुखेनोदयात्॥ धर्मायारिद
शांत्यमृत्युषु बुधाच्चंद्रात्त्रिषड्लाभगः षष्ठायांत्यगतः सितात्स्वर गुरोः प्राप्त्यंत्यधी
शत्रुषु॥७॥ इति निगदितमिष्टं नेष्टमन्यद्विशेषादधिकफलविपाकं जन्मभात्तत्र द
द्युः॥ उपचयगृहमित्रस्वोच्चगैः पुष्टमिष्टं त्वपचयगृहनीचारातिगैर्नेष्टसंपत्॥८॥
रा इति श्रीवराहमिहिराचार्यविरचिते बृहज्जातकेऽष्टकवर्गोध्यायो नवमः॥ ९ ॥
अर्थाप्तिः पितृपितृपत्निशत्रुमित्रभ्रातृस्त्रीभृतजनकाद्दिवाकराद्यैः॥ होरेंदोर्दश
मगतैर्विकल्पनीया भेंदुर्कास्पदपतिगांशनाथवृत्त्या॥ १ ॥ अर्कांशे तृणकनको
र्णभेषजाद्यैश्चंद्रांशे कृषिजलजांगनाश्रयाच्च॥ धात्वग्निप्रहरणसाहसैः कुजांशे सौ

बृहं०तक म्यांशे लिपिगणितादिकाव्यशिल्पैः ॥२॥ जीवांशे द्विजविबुधाकराद्रिधर्मैः काव्यांशे मणि
१५ रजतादिगोमहिष्यैः ॥ सौरांशे श्रमवधभारनीचशिल्पैः कर्मेशाध्युषितनवांशकर्मसिद्धिः
॥३॥ मित्रारिस्वगृहगतैर्ग्रहैस्ततोर्थं तुंगस्थे बलिनि च भास्करे स्ववीर्यात् ॥ आयस्थैरु
दयधनाश्रितैश्च सौम्यैः संचिंत्यं बलसहितैरनेकधास्वं ॥ ४ ॥ इति श्रीवराहमिहि
राचार्यविरचिते बृहज्जातके कर्माजीवाध्यायो दशमः ॥ १० ॥ प्राहुर्यवनाः स्वतुं
गगैः क्रूरैः क्रूरमतिर्महीपतिः ॥ क्रूरैस्तु न जीवशर्मणः ॥ पक्षे क्षित्यधिपः प्रजायते ॥ १ ॥
वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिश्च स्वोच्चेषु षोडश नृपाः कथितैकलग्ने ॥ द्व्येकाश्रिते राम:॥
षु च तथैकतमे विलग्ने स्वक्षेत्रगे शशिनि षोडश भूमिपाः स्युः ॥ २ ॥ वर्गोत्तमगते लग्ने १५
चंद्रे वा चंद्रवर्जितैः ॥ चतुराद्यैर्ग्रहैर्दृष्टे नृपा द्वाविंशतिः स्मृताः ॥ ३ ॥ यमे कुंभेऽर्केऽजे ग
विशशिनि तैरेव तनुगैर्नृयुक्सिंहालिस्थैः शशिजगुरुवक्रैर्नृपतयः ॥ यमेंदू तुंगेऽगे
सवितृशशिजौ षष्ठभवने तुलाजेंदुक्षेत्रैः ससितकुजजीवैश्च नरपौ ॥ ४ ॥ कुजे तुंगेऽर्केंद्वोर्ध के

नुषि यमलग्ने च कुपतिः पतिर्भूमेश्चान्यः क्षितिसुतविलग्ने सशशिनि ॥ सचंद्रे सौरेऽस्ते सुरपति
गुरौ चापधरगे स्वतुंगस्थे भानावुदयमुपयाते क्षितिपतिः ॥ ५ ॥ वृषे सेंदौ लग्ने सवितृगुरु
तीक्ष्णांशुतनयैः सुहृज्जायाखस्थैर्भवति नियमान्मानवपतिः ॥ मृगे मंदे लग्ने सहजरिपु गे
धर्मव्ययगतैः शशांकाद्यैः ख्यातः पृथुगुणयशाः पुंगवपतिः ॥ ६ ॥ वृषे सेंदौ जीवे मृगसु
खगते भूमितनये स्वतुंगस्थो लग्ने भृगुज शशिजावत्र नृपती ॥ सुतस्थौ वक्रार्कौ गुरुशशि
सिताश्चापि हिबुके बुधे कन्यालग्ने भवति हि नृपोऽन्योऽपि गुणवान् ॥ ७ ॥ वृषे सेंदौ लग्ने घ
टमृगमृगेंद्रेषु सहितैर्यमारार्कैर्योऽभूत्स खलु मनुजः शास्ति वसुधां ॥ अजे सारे मूर्तौ श
शिगृहगते चामरगुरौ सुरेज्ये वा लग्ने धरणिपतिरन्योऽपि गुणवान् ॥ ८ ॥ कर्किणि ल
ग्ने तत्स्थे जीवे चंद्रसितज्ञैरायप्राप्तैः ॥ मेषगतेऽर्के जातं विद्याद्विक्रमयुक्तं पृथिवीशं ॥ ९ ॥
मृगमुखेऽर्कतनयस्तनुसंस्थः क्रियकुलीरहरयोऽधिपयुक्ताः ॥ मिथुनतौलिसहितौ बु

धशुक्रो यदि ततः पृथुयशाः पृथिवीशः ॥१०॥ स्वोच्चसंस्थे बुधे लग्ने भृगौ मेषूरणाश्रिते ॥
सजीवेऽस्ते निशानाथे राजा मंदारयोः सुते ॥११॥ अपि खलकुलजाता मानवा राज्यभा
जः किमुत नृपकुलोत्थाः प्रोक्तभूपाख्ययोगैः ॥ नृपतिकुलसमुत्थाः पार्थिवा वक्ष्य
माणैर्भवति नृपतितुल्यस्तेष्वभूपालपुत्रः ॥१२॥ उच्चस्वत्रिकोणगैर्बलस्थैस्त्र्याद्यै
र्भूपतिवंशजा नरेंद्राः ॥ पंचादिभिरन्यवंशजातास्तैर्हीनैर्वित्तयुता न भूमिपालाः ॥
॥१३॥ लेखास्थेऽर्के जेंदौ लग्ने भौमे स्वोच्चे कुंभे मंदे ॥ चापप्राप्ते जीवे राज्ञः पुत्रं विद्या रामः॥
त्पृथ्वीनाथं ॥१४॥ स्वर्क्षे शुक्रे पातालस्थे धर्मस्थानं प्राप्ते चंद्रे ॥ दुश्चिक्यांगप्राप्तिप्रा १६
प्तैः शेषैर्जातः स्वामी भूमेः ॥१५॥ सौम्ये वीर्ययुते तनुयुक्ते वीर्याढ्ये च शुभे शुभप्रा
ते ॥ धर्मार्थोपचयेष्ववशेषैर्धर्मात्मा नृपजः पृथिवीशः ॥१६॥ वृषोदये मूर्तिधना
रिलाभगैः शशांकजीवार्कसुतापरैर्नृपः ॥ सुखे गुरौ खे शशितीक्ष्णदीधितौ

यमोदये लाभगतैर्नृपोऽपरैः ॥१७॥ मेषूरणायततनुगाः शशिमंदजीवा ज्ञारौ धने
सितरवी हिबुके नरेंद्रं ॥ वक्रासितौ शशिसुरेज्यसितार्कसौम्या होरासुखास्तशुभ
खातिगताः प्रजेशं ॥१८॥ कर्मलग्नयुतपाकदशायां राज्यलब्धिरथवात्र बलस्य ॥
शत्रुनीचगृहयातदशायां छिद्रसंश्रयदशाः परिकल्प्याः ॥१९॥ गुरुसितबुधलग्ने
सप्तमस्थेऽर्कपुत्रे वियति दिवसनाथे भोगिनां जन्म विंद्यात् ॥ शुभबलयुतकेंद्रैः क्रूरभ
स्थैश्च पापैर्व्रजति शबरदस्युस्वामितामर्थभाक् च ॥२०॥ इति श्रीवराहमिहिराचा
र्यविरचिते बृहज्जातके राजयोगाध्याय एकादशः ॥ ११ छ ॥ नवदिग्वसव
स्त्रिकाग्निवेदैर्गुणिता द्वि २ त्रि ३ चतु ४ र्विकल्पजाः स्युः ॥ यवनैस्त्रिगुणा हि
षट्शतीसा ६०० कथिता विस्तरतोऽत्र तत्समासः ॥ १ ॥ रज्जुर्मुशलं नलश्चराद्यैः
सत्यश्चाश्रयजान् जगाद योगान् ॥ केंद्रैः सदसद्युतैर्दलाख्यौ स्रक्सर्पौ कथि

॥बृहज्जातक तोपराशरेण ॥२॥ योगाव्रजंत्याश्रयजाः समत्वं यवाब्जवज्राण्डजगोलकाद्यैः ॥ कें
१७ द्रोपगैः प्रोक्तफलौ दलाख्यावित्याकृतिस्थेन पृथक्फलौ तु ॥३॥ आसन्नकेंद्रभव
नद्वयगैर्गदाख्यस्तन्वस्तगेषु शकटं विहगः खबंधोः ॥ शृंगाटकं नवमपंचमलग्नसं
स्थैर्लग्नान्यगैर्हलमिति प्रवदंति तज्ज्ञाः ॥४॥ शकटांडजवच्छुभाशुभैर्वज्रं तद्वि
परीतगैर्यवः ॥ कमलं तु विमिश्रसंस्थितैर्वापी तद्यदि केंद्रबाह्यतः ॥५॥ पूर्वशास्त्रा
नुसारेण मया वज्रादयः कृताः ॥ चतुर्थभवने सूर्याज्ज्ञसितौ भवतः कथं ॥६॥ रामः ॥
कंटकादिप्रवृत्तैस्तु चतुर्गृहगतैर्ग्रहैः ॥ यूपेषु शक्तिदंडाख्या होराद्यैः कंटकैः क्र १७
मात् ॥७॥ नौकूटच्छत्रचापानि तद्वत्सप्तर्क्षसंस्थितैः ॥ अर्धचंद्रस्तु नावाद्यैः प्रो
क्तस्त्वन्यर्क्षसंस्थितैः ॥८॥ एकांतरगतैरर्थात्समुद्रः षड्गृहाश्रितैः ॥ विलग्नादि
स्थितैश्चक्रमित्याकृतिजसंग्रहः ॥९॥ संख्यायोगाः सप्तसप्तर्क्षसंस्थैरेका

सरुजः

पायाद्वल्लकी दामिनी च ॥ पाशः केदारश्च शूलो युगं च गोलश्चान्यान्पूर्वमुक्तान्विहाय ॥१०॥
ईर्ष्युर्विदेशनिरतोध्वरुचिश्च रज्ज्वां मानी धनी च मुशले बहुकृत्यसक्तः ॥ व्यंगः स्थिराढ्यनिपु
णो नलजश्च युक्तो भोगान्वितो भुजगजो बहुदुःखभाक्स्यात् ॥११॥ आश्रयोक्ता
विफला भवंत्यन्यैर्विमिश्रिताः ॥ मिश्रा यैस्ते फलं दद्युरमिश्राः स्वफलप्रदाः ॥१२॥ यज्वार्थ
भाक्सततमर्थरुचिर्गदायां तत्सूत्रिभुक् शकटजः कुदारः ॥ दूतोटनः कलहकृद्विहगे प्रदि
ष्टः शृंगाटके चिरसुखी कृषिकृद्धलाख्ये ॥१३॥ वज्रेंत्यपूर्वसुखिनः सुभगोतिशूरो वीर्या
न्वितोप्यसुखितो व्ययतः ॥ विख्यातकीर्त्यमितसौख्यगुणश्च पद्मे वाप्यां तनुस्थिरसुखो
निधिकृन्न दाता ॥१४॥ त्यागात्मवान्क्रतुवरैर्यजते च यूपे हिंस्रोथ गुप्तिपतिकृच्छरकृ
च्छराख्ये ॥ नीचोलसः सुखधनैर्वियुतश्च शक्तौ दंडे प्रियैर्विरहितः पुरुषोंत्यवृत्तिः ॥१५॥
कीर्त्यायुतश्चलसुखः कृपणश्च नौजः कूटेनृतप्लवनबंधनपश्च जातः ॥ छत्रोद्भवः स्वजनसौ
ख्यकरोंत्यसौख्यः शूरश्च कार्मुकभवः प्रथमांत्यसौख्यः ॥१६॥ अर्धेंदुजः सुभगकांतव

॥बृह०तक पुःप्रधानस्तोयाल्पयेनरपतिस्त्रितिमस्तभोगी ॥ चक्रेनरेंद्रमुकुटद्युतिरंजितांघ्रिर्वर्णो
१९ द्भवश्चनिपुणःप्रियगीतनृत्यः ॥ १७ ॥ दातान्यकार्यनिरतःपशुपश्चदाम्निपाशेधनार्जनवि
शीलसभृत्यबंधुः ॥ केदारजःकृषिकरःसुबहूपयोग्यः ॥ शूरक्षतोधनरुचिर्विधनश्चशूले
॥ १८ ॥ धनविरहितःपाखंडीवायुगेत्वथगोलकेविधनमलिनोज्ञानोपेतःकुशिल्प्यलसोट
नः ॥ इतिनिगदितायोगाःसार्द्धंफलैरिहनाभसानियतफलदाश्चिंत्याह्येतेसमस्तद
शास्वपि ॥ १९ ॥ इतिश्रीवराहमिहराचार्यविरचितेबृहज्जातकेनाभसयोगाध्यायोद्वा रामः॥
दशः ॥ १२ ॥ अथमसमवरिष्ठान्यर्ककेंद्रादिसंस्थेशशिनिविनयवित्तज्ञानधी १९
नैपुण्यानि ॥ अहनिनिशिचचंद्रेस्वाधिमित्रांशकेवासुरगुरुसितदृष्टेवित्तवान्स्यात्सु
खीच ॥ १ ॥ सौम्यैःस्मरारिनिधनेष्वधियोगइंदोस्तस्मिंश्चमूपसचिवक्षितिपालजन्म ॥ संप
न्नसौख्यविभवाहतशत्रवश्चदीर्घायुषोविगतरोगभयाश्चजाताः ॥ २ ॥ हित्वार्कंसुनफा

नफादुरुधराःस्वांत्योभयस्थैर्ग्रहैःशीतांशोःकथितोन्यथातुबहुभिःकेमद्रुमोन्यैस्त्वसौ ॥ केंद्रे
शीतकरेथवाग्रहयुतेकेमद्रुमोनेष्यतेकेचित्केंद्रनवांशकेषुचवदंत्युक्तिःप्रसिद्धानते ॥ ३ ॥ त्रिं
शत्सरूपाःसुनफानफाख्याःषष्टित्रयंदौरुधरेप्रभेदाः ॥ इच्छाविकल्पैःक्रमशोभिनीयनीतेनि
वृत्तिःपुनरन्यनीतिः ॥ ४ ॥ स्वयमधिगतवित्तःपार्थिवस्तत्समोवाभवतिहिसुनफायांधीधन
ख्यातिमांश्च ॥ प्रभुरगदशरीरःशीलवान्ख्यातकीर्तिर्विषयसुखव[illegible]सुवेशोनिर्वृतश्चान
फायां ॥ ५ ॥ उत्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितोदुरुधराप्रभवःसुभृत्यः ॥ के
मद्रुमेमलिनदुःखितनीचनिःस्वाःप्रेष्याःखलाश्चनृपतेरपिवंशजाताः ॥ ६ ॥ उत्साहशौ
र्यधनसाहसवान्महीजःसौम्यःपटुःसुवचनोनिपुणःकलासु ॥ जीवोर्थधर्मसुखभुङ्नृप
पूजितश्चकामीभृगुर्बहुधनोविषयोपभोक्ता ॥ ७ ॥ परविभवपरिच्छदोपभोक्तारवित
नयोबहुकार्यकृद्गणेशः ॥ अशुभकृदुडुपोह्निदृश्यमूर्तिर्गलितनुश्चशुभोन्यथान्यदूह्यं
॥ ८ ॥ लग्नादतीववसुमान्वसुमांछशांकात्सौम्यग्रहैरुपचयोपगतैःसमस्तैः ॥

बृह॰जा॰ द्वाभ्यांसंयोगेनवसुमांश्चतद्धनंतायामन्येषसत्त्वपिफलैषिदमुक्तंरेन॥९॥इतिश्रीवराहमिहरा
३९ चार्यविरचितेबृहज्जातकेचंद्रयोगाध्यायस्त्रयोदशः॥ १३ ॥ ७ ॥तिग्मांशुर्जनयत्यु
षेशसहितोयंत्राश्मकारंनरंभौमेनाघरतंबुधेननिपुणंधीकीर्त्तिसौख्यान्वितंक्रूरंवाक्
पतिनान्यकार्यनिरतंशुक्रेणरंगायुधैर्लब्धस्वंरविजेनधातुकुशलंभांडप्रकारेषुवा॥१॥
क्रूरस्थ्यासवकुंभपण्यमशिवंमातुःसवक्रःशशीसज्ञःप्रश्रितवाक्यमर्थनिपुणंसौभाग्य
कीर्त्यान्वितं॥विक्रांतंकुलमुख्यमस्थिरमतिंवित्तेश्वरंसांगिराःवस्त्राणांससितःक्रिया रामः॥
दिकुशलंसार्किःपुनर्भूसुतं॥२॥मूलादिस्नेहकूटंव्यवहरतिवणिग्बाहुयोद्धाससौ
म्यःपुर्याध्यक्षःसजीवेभवतिनरपतिःप्राप्तवित्तोद्विजोवा॥गोपोमल्लोथदक्षःपरयुवति ३९
रतोद्यूतकृत्सासुरेज्येदुःखार्त्तोसत्यसंधःससवितृतनयेभूमिजेनिंदितश्च॥३॥सौ
म्येरंगचरोबृहस्पतियुतेगीतप्रियोनृत्यवित्वाग्मीभूगणपःसितेनमृदुनामायापटुर्लंघ

कः॥सद्विद्योधनदारवान्बहुगुणःशुक्रेणयुक्तेगुरौज्ञेयःश्मश्रुकरोसितेनघटकृज्जातोन्नका
रोपिवा॥४॥असितसितसमागमेल्पचक्षुर्युवतिसमाश्रयसंप्रवृद्धवित्तः॥भवतिचलि
पिपुस्तकादिचित्रकृत्कथितफलैःपरतोपरेविकल्प्याः॥५॥इतिश्रीवराहमिहराचार्यविरचितेबृह
ज्जातकेद्विग्रहयोगाध्यायश्चतुर्दशः॥ १४ ॥ ७ ॥एकस्थैश्चतुरादिभिर्बलयुतैर्जा
ताःपृथग्वीर्यगैःशाक्याजीविकभिक्षुवृद्धचरकानिर्ग्रंथवान्याशनाः॥माहेयज्ञगुरुक्षपा
करसितप्राभाकरीनैःक्रमात्प्रव्रज्याबलिभिःसमाःपरिजितैस्तत्स्वामिभिःप्रच्युतिः॥१॥
रविलुप्तकरैरदीक्षिताबलिभिस्तद्गतभक्तयोनराः॥अभियाचितमात्रदीक्षिता
निहतैरन्यनिरीक्षितैरपि॥२॥जन्मेशोन्यैर्यदिदृष्टोर्कपुत्रंपश्यत्यार्किर्जन्मपंवाबलो
नं॥दीक्षांप्राप्नोत्यार्किद्रेष्काणसंस्थेभौमार्क्यंशेसौरदृष्टेचचंद्रे॥३॥सुरगु
रुशशिहोरास्वार्किदृष्टासुधर्मेगुरुरथनृपतीनांयोगजस्तीर्थकृत्स्यात्॥नवम
भवनसंस्थेमंगेन्यैरदृष्टेभवतिनरपयोगेदीक्षितःपार्थिवेंद्रः॥५॥इतिश्रीव
जै

राहमिहराचार्यविरचिते बृहज्जातके श्रव्यायोगाध्यायः पंचदशः ॥ १५ ॥ छ ॥ प्रियभूषणः
सरूपः सुभगो दक्षोऽश्विनीषु मतिमांश्च ॥ कृतनिश्चयः सत्यारुग्दक्षः सुखितश्च भरणीषु ॥
॥ १ ॥ बहुभुक् परदाररतस्तेजस्वी कृत्तिकासु विख्यातः ॥ रोहिण्यां सत्यशुचिः प्रियंवदः
स्थिरमतिः सुरूपश्च ॥ २ ॥ चपलश्चतुरो भीरुः पटुरुत्साही धनी मृगे भोगी ॥ शठगर्वि
तः कृतघ्नो हिंस्रः पापश्च रौद्रर्क्षे ॥ ३ ॥ दांतः सुखी सुशीलो दुर्मेधा रोगभाक् पिपासुश्च
॥ अल्पेन च संतुष्टः पुनर्वसौ जायते मनुजः ॥ ४ ॥ शांतात्मा सुभगः पंडितो धनी धर्म
संश्रितः पुष्ये ॥ शठसर्वभक्ष्यपापः कृतघ्नधूर्तश्च भौजंगे ॥ ५ ॥ बहुभृत्यधनो भोगी
सुरपितृभक्तो महोद्यमः पित्र्ये ॥ प्रियवाक् दाता द्युतिमान् अटनो नृपसेवको भाग्ये
॥ ६ ॥ सुभगो विद्याप्तधनो भोगी सुखभाक् द्वितीयफाल्गुन्यां ॥ ननउत्साही धृष्टः पानपो
घृणी तस्करो हस्ते ॥ ७ ॥ चित्रांबरमाल्यधरः सुलोचनांगश्च भवति चित्रायां ॥ दांतो

वणिक् कृपालुः प्रियवाक् धर्माश्रितः स्वातौ ॥ ८ ॥ ईर्ष्युर्लुब्धो द्युतिमान् वचनपटुः कलहकृ
द्विशाखासु ॥ आढ्यो विदेशवासी क्षुधालुरटनोऽनुराधासु ॥ ९ ॥ ज्येष्ठासु न बहुमित्रः सं
तुष्टो धर्मकृत्प्रचुरकोपः ॥ मूले मानी धनवान्सुखितो हिंस्रः स्थिरो भोगी ॥ १० ॥ इष्टानंद
कलत्रो मानी दृढसौहृदश्च जलदैवे ॥ वैश्वे विनीतधार्मिकबहुमित्रकृतज्ञसुभगश्च ॥ ११ ॥
श्रीमान् श्रवणे श्रुतवानुदारदारो धनान्वितः ख्यातः ॥ दाताढ्यः शूरगीतप्रियो धनिष्ठासु
धनलुब्धः ॥ १२ ॥ स्फुटवाक् व्यसनी रिपुहा साहसिकः शतभिषजि दुर्ग्राह्यः ॥ भाद्रपदा
सूद्विग्नः स्त्रीजितधनपटुरदाता च ॥ १३ ॥ वक्ता सुखी प्रजावान् जितशत्रुर्धार्मिको
द्वितीयासु ॥ संपूर्णांगः सुभगः शूरः शुचिरर्थवान् पौष्णे ॥ १४ ॥ वृत्ताताम्रदृगुष्णशा
कलघुभुक् क्षिप्रप्रसादोऽटनः कामी दुर्बलजानुरस्थिरधनः शूरोंगनावल्लभः ॥ सेवां
गः कुनखी व्रणांकितशिरा मानी सहोत्थाग्रजः शक्त्या पाणितलांकितो ति चपल

स्तोयेचभीरुः क्रिये ॥१५॥कांतःखेलगतिःपृथूरुवदनःपृष्ठास्यपार्श्वांकितस्त्यागीक्ले
शसहःप्रभुःककुदवान्कन्याप्रजःश्लेष्म[illegible]कः॥पूर्वैर्बंधुधनात्मजैर्विरहितःसौभाग्यु
क्तःक्षमीदीप्ताग्निःप्रमदाप्रियःस्थिरसुहृन्मध्यांत्यसौख्योगवि ॥१६॥स्त्रीलोलः
सुरतोपचारकुशलस्ताम्रेक्षणःशास्त्रवित्दूतःकुंचितमूर्धजःपटुमतिर्हास्येंगितेद्यूत
वित्॥चार्वंगःप्रियवाक्प्रभक्षणरुचिर्गीतप्रियोनृत्यवित्क्लीबैर्यातिरतिंसमुन्नत
नसाश्चंद्रेतृतीयर्क्षगे ॥१७॥आवक्रद्रुतगःसमुन्नतकटिःस्त्रीनिर्जितःसत्सुहृ
दैवज्ञःप्रचुरालयःक्षयधनैःसंयुज्यतेचंद्रवत्॥१८॥ह्रस्वःपीनगलःसमेतिचव
शंसाम्भःसुहृदःवत्सलस्तोयोद्यानरतःस्ववेश्मसहितेजातःशशांकेनरः॥१८॥
तीक्ष्णस्थूलहनुर्विशालवदनःपिंगेक्षणोल्पात्मजःस्त्रीद्वेषीप्रियमांसकाननन

गःकुपत्यकार्येचिरं॥क्षुत्तृष्णोदररदंतमानसरुजासंपीडितस्त्यागवान्विक्रांतःस्थिरधीः
सुगर्वितमनामातुर्विधेयोर्कभे॥१९॥व्रीडामंथरचारुवीक्षणगतिःस्रस्तांसबाहुःसु
खीश्लक्ष्णःसत्यरतःकलासुनिपुणःशास्त्रार्थविद्धार्मिकः॥मेधावीसुरतप्रियःपरगृ
हैर्वित्तैश्चसंयुज्यतेकन्यायांपरदेशगःप्रियवचाःकन्याप्रजोल्पात्मजः॥२०॥देव
ब्राह्मणसाधुपूजनरतःप्राज्ञःशुचिःस्त्रीजितःप्रांशुश्चोन्नतनासिकःकृशचलद्गा
त्रोटनोऽर्थान्वितः॥हीनांगःक्रयविक्रयेषुकुशलोदेवद्विनामासरुग्बंधूनामुपका
रकृद्विभषितस्त्यक्तःसुतैःसप्तमे॥२१॥पृथुलनयनवक्षावृत्तजंघोरुजानुर्जनक
गुरुवियुक्तःशैशवेव्याधितश्च॥नरपतिकुलपूज्यःपिंगलःक्रूरचेष्टोझषकुलि
शखगांकःप्रछन्नपापोलिजातः॥२२॥व्याद्दीर्घास्यशिरोधरःपितृधनस्त्यागीक

॥बृहज्जातक
२२

विवर्णर्यवान्वक्रास्थूलरदः श्वबाधरनसः कर्मोद्यतः शिल्पवित्॥कुब्जांसः कुनखीसभां
सळभुजः प्रागल्भ्यवान्धर्मविद्बंधुद्विट्नचकाम्समेति चवशांसाम्निकुसाध्योश्वजः॥२३॥
नित्यंलालयतिस्वदारतनयान्धर्मध्वजोधः कृशः स्वक्षः श्यामकटिर्गृहीतवचनः सौमा
ष्पयुक्तोलसः॥शीतालुर्मनुजोध्वनश्च मकरेसत्वाधिको वाक्पटुःरूक्षोगम्यतरांगनासु
निरतः संत्यक्तलज्जोघृणः॥२४॥करभगलः शिरालखरलोमशदीर्घतनुः पृथुचरणो
रुपृष्ठजघनास्यकटिर्जरठरः॥परवनितार्थपापनिरतः क्षयवृद्धियुतः प्रियकुसुमानुलेपन राम:॥
सुहृद्घटजोध्वसहः॥२५॥जलपरधनभोक्तादारवासोनुरक्तः समरुचिरशरीरस्तुंग
नासोबृहत्कः॥अभिभवतिसपत्नान्स्त्रीजितश्चारुदृष्टिर्द्युतिनिधनभोगीपंडितश्चांत्यरा २२ +ह ३४
शौ॥२६॥बलवतिराशौतदधिपतौचस्वबलयुतः स्याद्यदितुहिनांशुः॥कथितफलाना
मविकलदातासशिवदतोन्येपनुपरिचिंत्याः॥२७॥प्रथितश्चतुरोटनोल्पवित्तः क्रियगे

त्वायुधभृद्धितुंगभागे॥गविवस्त्रसुगंधपण्यजीवीवनिताद्विट्कुशलश्चगेयवाद्ये॥२८॥विद्या
ज्योतिषवित्तवान्मिथुनगेभानौकुलीरस्थितेतीक्ष्णोस्वःपरकार्यकृच्छ्रमपथक्लेशैश्चसंयुज्यते
॥सिंहस्थेवनशैलगोकुलरतिर्वीर्यान्वितोज्ञःपुमान्कन्यास्थेलिपिलेख्यकाव्यगणितःज्ञा
नान्वितःस्त्रीवपुः॥२९॥जातस्तौलिनिशौंडिकोध्वनिरतोहैरण्यकोनीचकृत्क्रूरःसाहसि
कोविषार्जितधनःशस्त्रांतगोलिस्थिते॥सत्पूज्योधनवान्धनुर्धरगतेतीक्ष्णोभिषक्कारु
कोनीचोज्ञःकुवणिक्मृगेल्पधनवान्लुब्धोप्रभाग्यैरतः॥३०॥नीचोघटेतनयभाग्यपरि
च्युतोऽस्वस्तोयोत्थपण्यविभवोवनिताहृतोंत्ये॥नक्षत्रमानवतनुःप्रतिमेविभागेलक्ष्म्यादि
शेद्धिमरश्मिदिनेशयुक्ते॥३१॥नरपतिसत्कृतोटनश्चमूपवणिक्सधनाःक्षततनुश्चौरभू
रिविषयाश्चकुजःस्वगृहे॥युवतिजितान्सुहृत्सुविषमान्परदाररतान्कुहकसुवेषभीरुप
रुषान्सितभेजनयेत्॥३२॥बोधसहस्तनयवान्विसुहृत्कृतज्ञोगांधर्वयुद्धकुशलःकृपणो
भयोर्थी॥चांद्रेर्थवान्सलिलयानसमर्जितस्वःप्राज्ञश्चभूमितनयेविकलःखलश्च॥३३॥

॥बृह् जातक निःस्वः क्लेशसहो वनांतरचरः सिंहेल दारात्मजो जैवेनैकरिपुर्नरेंद्रसचिवः ख्यातोभयोत्साहजः
२२ डः स्वार्तो निधनोऽटनोऽनृतरतस्तीक्ष्णश्च कुंभस्थिते भौमे भूरिधनात्मजो मृगगते भूपो
थवा नृसमः॥२४॥ यंतेर्णपानरतनालिकचौरनिःस्वाः कुस्त्रीककूटवदसत्यरताः कुज
र्क्षे॥ आचार्यभूरिसुतदारधनार्जनेष्टाः शौक्रेवदान्यगुरुभक्तिरताश्च सौम्ये॥२५॥
विकत्थनः शास्त्रकलाविदग्ध्यः प्रियंवदः सौख्यरतस्तृतीये॥ जेता जितस्वः स्वजनस्यरा
तुः शशांकजे शीतकरर्क्षयुक्ते॥२६॥ स्त्रीद्वेष्यो विधनसुखात्मजोऽटनोज्ञः स्त्रीलोलः सुपरि रामः॥
भवोऽर्कराशिगेज्ञे॥ त्यागी ज्ञः प्रचुरगुणः सुखीक्षमावान्युक्तिज्ञो विगतभयश्च पृष्ठ
राशौ॥२७॥ परकर्मकृदस्वशिल्पबुद्धिर्ऋणवान्विष्टिकरो बुधेर्कजर्क्षे॥ नृपसत्कृ २२
तपंडितास्वाक्यान वमंत्र्येजिनस्तवकोन्यशिल्पः॥२८॥ सेनानीर्बहुदारवित्ततन
योदानासुभृत्यः क्षमी नेजोदारगुणान्वितः सुरगुरोः ख्यातः पुमान्कौजभे॥ कल्याणः
ससुखार्थमित्रतनयस्त्यागी प्रियः शौक्रभे बौधे भूरिपरिच्छदात्मजसुहृत्साचिव्ययु
क्तः सुखी॥२९॥ चांद्रे रत्नसुतः स्वदारविभवः शाह्नः सुखैः स्विनः सिंहे स्याद्बलना

यकः सुरगुरोः प्रोक्तं च यच्चंद्रमे॥ स्वर्क्षे मांडलिकोनरेंद्रसचिवः सेनापतिर्वा धनी कुंभे कर्कटखलकलानि
मकरेनीचोल्पवित्तोसुखी॥४०॥ परयुवतिरतस्तदर्थवादैर्हृतविभवः कुलपांशनः कुजर्क्षे॥ स्व
लमतिधनोनरेंद्रपूज्यः स्वजनविभुः प्रथितोभयः सितेस्वे॥४१॥ नृपकृत्यकरोर्थवान्कलाविन्मि
थुनेषष्ठगतेतिनीचकर्मा॥ रविजर्क्षगतमरारिपूज्योऽसुभगस्त्रीविजितोरतः कुनार्यां॥४२॥ द्वि
भार्योर्थ्यभीरुः प्रबलमदयुतः कृष्णगशिमेह्रौ योषामार्थैः प्रवरयुवतिर्मदतनयः॥ गुणैः पूज्यः स
स्वस्तुरगसहिते दानवगुरौ झषेविद्वानाढ्यो नृपजनितपूजोतिसुभगः॥४३॥ मूर्खोटनः कप
टवान्विसुहृद्यमेज्ञेकीटेतुबंधवधभाक्चपलोघृणश्च॥ निर्हीसुखार्थतनयः स्खलितश्च ले
ख्यरक्षापतिर्भवति मुख्यपतिश्च बौधे॥४४॥ वक्रेस्थिपतौनवहुविभवो भूरिभार्यो नृपस्त्रैस्या
तः स्त्रौद्यो गणपुरबलग्रामपूज्योर्थवांश्च॥ कार्किण्यरत्नो विकलदशनो मानुहीनोसुतघ्नः सिं
हेनार्यो विसुखतनयो वष्टिकृत्सूर्यपुत्रे॥४५॥ स्वेतः प्रस्यपतोनरेंद्रभवने सत्पुत्रजायाधनो
जीवसेत्रगतेर्कजे पुरबलग्रामाग्रनेताथवा॥ अन्यस्त्रीधनसंवृतः पुरबलग्रामाग्रणीर्मंदहक्
स्वसेत्रेमलिनः स्थिरार्थविभवो भोक्ताच जातः पुमान्॥४६॥ शशिरिकरसमागमेक्षणानां
सदृशफलं प्रवदंति लग्नजातं॥ फलमधिकमिदं यदत्र भावा भवनभनाथगुणैर्विचिंतनीयाः॥

॥बृहज्जातक ॥ ४७ ॥ इतिश्रीवराहमिहिराचार्यविरचितेबृहज्जातकेराशिशीलाध्यायःषोडशः॥१६
२५ ॥ ७ ॥ चंद्रेभूपबुधौनृपोपमगुणःस्तेनोधनाश्चाजगेनिस्वःस्तेननृमान्यभूपध
निनःप्रेष्यःकुजाद्यैर्गवि॥ नृस्थेयोध्युव्यवहारिपार्थिवबुधाश्चामीनंतुवायाधनीस्वर्क्षेयोद्ध
कविज्ञभूमिपनयोयोजीवदृष्टोगिणो॥१॥ ज्योतिर्ज्ञाढ्यनरेंद्रनापितनृपस्मेश्वरा
बुधाद्यैर्हरौतद्वत्पचमर्पनेपुण्ययुतापष्ठेशुभैस्त्र्याश्रयः॥ जूके भूपसुवर्णकारवणि
जःशेषक्षितनैस्रुतैर्नकीटेयुग्मपितानानन्यरजकोव्यगोधनोभूपतिः॥२॥ ज्ञान
वीराजनाश्रयाश्चतुरगेपापैःसदंभाराढ्याः स्वर्नीशानरेंद्रपंडिततनीधेर्ह्योत्प
भूपोत्सगे॥ भूपोभूपसमोन्यदाररतःशेषैश्चकुंभस्थितेदास्यज्ञोन्यपनिवु — रामः॥
धश्चतुपगेपापश्चपापेक्षिते॥ ३ ॥ होरेशर्क्षदलाश्रितैःशुभकरोदृष्टःशशीतद्गतःत्र्यंशेत — २५
त्पतिभिःसुहृद्भवनगैर्वावीक्षितःशस्यते॥ यत्प्रोक्तंप्रतिराशिवीक्षणफलंतद्द्वादशांशेस्मृतं
सूर्याद्यैरवलोकितेपिशशिनिज्ञेयंनवांशेष्वितः॥ ४ ॥ आरक्षिकोवधरुचिःकुशलोनियु
*तु२ द्धेभूपोर्थवान्कलहकृत्क्षितिजांशसंस्थे॥ मूर्खोन्यदारनिरतःसुकविःसितांशेसत्काव्यकृत्सु
खपरोन्यकलत्रगश्च॥ ५ ॥ बौधेहिरंगचरचौरकवीद्रमंत्रीगेयज्ञशिल्पिनिपुणाःशशिनि

स्थितेंशे॥ स्वांशेल्पगात्रधनलुब्धतपस्विमुख्यःस्त्रीपोष्यकृत्यनिरताश्चनिरीक्ष्यमाणे॥ ६ ॥ सक्रोधोनरप
तिसंमतोनिधीशःसिंहांशेप्रभुरसुतोतिहिंस्रकर्मा॥ जीवांशेप्रथितबलोरणोपदेष्टाहास्यज्ञःस
चिवविकामवृद्धशीलः॥ ७ ॥ अल्पापत्योदुःखितःसत्यपिस्वेमानासक्तःकर्मणिस्वेनुरक्तः॥ दुष्टस्त्री
ष्टःकृपणश्चार्किभांशेचंद्रेभानौतद्वदिंद्वादिदृष्टे॥ ८ ॥ वर्गोत्तमस्वपरगेषुशुभंयदुक्तंतत्पुष्टमध्य
लघुताशुभमुत्क्रमेण॥ वीर्यान्वितोशकपतिर्निरूपद्धिपूर्वंराशीक्षणस्यफलमंशफलंददाति॥ ९॥
॥इतिश्रीवराहमिहिराचार्यविरचितेबृहज्जातकेदृष्टिफलाध्यायःसप्तदशः॥ १७ ॥ श्री ॥
शूरस्तब्धोविकलनयनोनिर्घृणोर्केतनुस्थेमेषेसस्वस्तिमिरनयनःसिंहसंस्थेनिशांधः॥ नी
चेंधोस्वःशशिगृहगतेबुद्बुदाक्षःपतंगेमूर्खेद्व्योनृपहृतधनोवक्त्ररोगीद्वितीये॥ १ ॥ मतिविक्रम
वांस्तृतीयगेर्केविसुखःपीडितमानसश्चतुर्थे॥ असुतोधनवर्जितस्त्रिकोणेबलवांश्चशत्रुजित
श्वशत्रुजाते॥ २ ॥ स्त्रीभिर्गतःपरिभवंमदगेपतंगेस्वल्पात्मजोनिधनगेविकलेक्षणश्च॥ ध
र्मेसुतार्थसुखभाक्सुखशौर्यभाक्खेलाभेप्रभूतधनवान्पतितस्तुरिष्फे॥ ३ ॥ मूकोन्मत्तज
डांधहीनबधिरःप्रेष्यःशशांकोदयेस्वर्क्षोजोच्चगतेधनीबहुसुतःसस्वःकुटुंबीधने॥ हिंस्रोभ्रातृगतेसु

॥बृहज्जातक० खिसनवयेतत्रोक्तभागाच्चितोनैकारिर्मृदुकायवह्निमदनस्तीक्ष्णोलसश्चारिगे ॥ ४ ॥ ईर्ष्युस्तीव्रमदो
२५ मदेबहुमतिर्व्योध्यहितश्चाष्टमेसौभाग्यात्मजमित्रबंधुधनभाक्धर्मस्थितेशीतगौ ॥ निष्पन्निसमुपे
तिधर्मधनधीशौर्येर्युतः कर्मगेख्यातोभावगुणाच्चितोभवगतेक्षुद्रोंगहीनोव्यये ॥ ५ ॥ लग्नेकुजेक्षत
तनुर्द्रुनगेकृदं नोधर्मेप्यवाप्यदिनकरसनिमोन्यसंस्थः ॥ विद्रुह्नीत्रबलपंडितमंत्र्यशत्रुर्धर्मेज्ञविश्रु
तगुणाः परतोर्कवज्ञे ॥ ६ ॥ विद्वान्खवाक्यः कृपणः सुखेच्चधीमानशत्रुःपितृतोधिकश्च ॥ नीच
स्तपस्वीसधनः सलाभः खलश्चजीवेक्रमशोविलग्नात् ॥ ७ ॥ स्मरनिपुणः सुखितश्चविलग्नेप्रि
यकलहोस्तगतेसुरतेप्सुः ॥ तनयगतेसुखिबोभृगुपुत्रेगुरुवदतोन्यउपेद्वीणोस्यात् ॥ ८ ॥ अ
दृष्टार्थोरोगीमदनवशगोत्यंतमलिनः शिशुत्वेपीडार्तःसवितृसुतलग्नेनिगदितः ॥ गुरुःस्वर्क्षेचोच्चे रामः॥
नृपतिसदृशोग्रामपुरपःसुविद्वांश्चार्वंगोदिनकरसमोन्यत्रकथितः ॥ ९ ॥ सुहृदरिपरकीयस्व २५
क्षेतुंगस्थितानांफलमनुपरिचिंत्यंलग्नदेहादिभावैः ॥ समुपचयविपत्तीसौम्यपापेषुसत्यःक
थयतिविपरीतंरिप्फषष्ठाष्टमेषु ॥ १० ॥ उच्चत्रिकोणस्वसुहृच्छत्रुनीचग्रहार्कगैः ॥ शुभंसंपूर्णपादो
नंदलपादाल्पनिःफलं ॥ ११ ॥ इतिश्रीवराहमिहराचार्यविरचितेबृहज्जातकेभावाध्यायोष्टा
दशः ॥ १८ ॥ ॥ ॥ कुलसमकुलबंधुमुख्यपूज्याधनिसुखभूपनृपाःस्वभैकवृद्ध्या ॥
बा २
४९

परिविभवसुहृत्स्वबंधुपोष्याःगणकबलेशनृपाश्चमित्रभेषु ॥ १ ॥ जनयतिनृपभेकोप्युच्चगोमित्रदृष्टःप्रचु
रधनसमेतंमित्रयोगाच्चसिद्धं ॥ विधनविसुखमूढव्याधितावंधनस्थावधदुरितसमेताःशत्रुनीचर्क्षगे
षु ॥ २ ॥ नकुंभलग्नंशुभमाहसत्योनभागभेदाद्यवनावदंति ॥ कस्यांशभेदोनतथास्तिराशेरतिप्रसं
गस्तिति विष्णुगुप्तः ॥ ३ ॥ यातेष्वसत्स्वसमभेषुदिनेशहोरांख्यातोमहोद्यमबलार्थयुतोऽतितेजाः
॥ चांद्रीशुभेषुयुजिमार्दवकांतिसौख्यसौभाग्यधीमधुरवाक्ययुतःप्रजातः ॥ ४ ॥ तास्वेवहोरास्व
परक्षभेषुज्ञेयानराःपूर्वगुणेषुमध्याः ॥ व्यत्यस्तहोराभवनस्थितेषुमर्त्योभवेत्युक्तगुणैर्विहीनः
॥ ५ ॥ कल्याणरूपगुणमात्मसुहृद्दृकाणेचंद्रोन्यगस्तदधिनाथगुणंकरोति ॥ व्यालोद्यतायुधच
तुश्चरणांडजेषुतीक्ष्णातिहिंस्रगुरुतल्परतोटनश्च ॥ ६ ॥ स्तेनोभोक्तापंडिताढ्योनरेंद्रःक्लीबः
श्रीवृष्टिकृद्दासवृत्तिः ॥ पापोहिंस्रोऽभीःस्ववर्गोत्तमांशेष्वेषामेशाराशिवद्द्वादशांशेः ॥ ७ ॥
जायाच्चितोबलिविभूषणसत्वयुक्तस्तेजोतिसाहसयुतश्चकुजेस्वभागे ॥ रोगीमृतस्वयुनतिवि
षमोन्यदारोदुःखीपरछदयुतोमलिनोर्कपुत्रे ॥ ८ ॥ स्वांशेगुरौधनयशःसुखबुद्धियुक्तस्तेज
स्विपूज्यनिरुगुद्यमभोगवंतः ॥ मेधाकलाकपटकाव्यविवादशिल्पशास्त्रार्थसाहसयुताःशशि
५०

जेतिमान्यः॥९॥खेत्रिंशांशेनकुसुतसुखारोग्यभार्योर्धरूक्षः शुक्रेतीक्ष्णः सुललितवपुः सुत्रकोणेद्वि
यश्च॥शूरस्तब्धोविषमवधकोसद्गुणाढ्योसुखिज्ञोचार्वोगेष्टोरविशशिसुतेषारपूर्वोशकेषु॥१०॥
इतिश्रीवराहमिहराचार्यविरचितेबृहज्जातकेआश्रययोगाध्यायस्त्कोनविंशतिः॥ १९ ॥ श्री॥
स्वर्क्षतुंगमूलत्रिकोणगाः केंद्रकेषु यावंत आश्रिताः॥सर्वएवतेन्योन्यकारकाः कर्मगस्तुतेषांविशेषतः॥१॥
कर्कटोदयगतेयथोडुपेस्वोच्चगाः कुजयमार्कसूरयः॥कारकानिगदिताः परस्परंलग्नगस्यसकलोंबरांबु
गः॥२॥स्वत्रिकोणोच्चगे हेतुरन्योन्यंयदिकर्मगः॥सुहृत्तद्गुणसंपन्नः कारकाख्योपिसस्मृतः॥३॥शुभ
वर्गोत्तमेजन्म वेशिस्थानेचसद्ग्रहे॥अशून्येषुचकेंद्रेषुकारकाख्यमहेषुच॥४॥मध्येवयसःसुखप्रदाः
केंद्रस्थागुरुजन्मलग्नपाः॥पृष्ठोभयसूदयराशिगस्त्वान्त्यांतःप्रथमेषुपाकदाः॥५॥दिनकररुधिरौ
प्रवयःकालेगुरुभृगुजौमवनस्यमध्ययातौ॥ रविसुतशशिनौविनिर्गमस्थौशशितनयःफलदस्तु
सार्वकालं॥६॥ इतिश्रीवराहमिहराचार्यविरचितेबृहज्जातकेप्रकीर्णाध्यायोविंशतिः॥ ॥
२० ॥ श्री ॥लग्नात्पुत्रकलत्रभेशुभपतिप्राप्तेथवालोकितेचंद्राद्वायदिसंपदस्तिहितयो
र्ज्ञेयोन्यथासंभवः॥पार्थेनोदयगेरवौरविसुतेमीनस्थितेदारहा पुत्रस्थानगतश्चपुत्रमरणंपुत्रोवनि
यच्छति॥१॥उच्चग्रहैःसितचतुरस्रसंस्थितेमध्यस्थितेभृगुतनयेथवोदयो॥सौम्यग्रहैरसि

रामः॥
२६

हितसंनिरीक्षितेजायावधोदहननिपातपापजः॥२॥लग्नाद्व्ययारिगतयोःशशितिग्मरश्म्योःपत्न्या
सहैकनयनस्यवदंतिजन्म॥द्यूनस्थयोर्नवमपंचमसंस्थयोर्वाशुक्रार्कयोर्विकलदारमुशंतिजातं
॥३॥कोणोदयेभृगुतनयेस्तचक्रसंधौवंध्यापतिर्यदिनसुतर्क्षमिष्टयुक्तं॥पापग्रहैर्व्ययमदल
*सं४ ग्नराशिस्थैःक्षीणशशिन्यसुतकलत्रजन्मधीस्थे॥४॥असितकुजयोर्वर्गेस्तस्थेसितेतदवेक्षितेप
रयुवतिगस्तौचेत्सेंदुस्त्रियासहपुंश्चलः॥भृगुजशशिनोरस्तेभार्यानरोविसुतोपिवापरिणिततनू
स्थोदृष्टेशुभैःप्रमदापती॥५॥वंशच्छेत्तास्वमदसुखगेश्चंद्रदेसेत्स्वपापैःशिल्पीत्र्यंशेशशिसुत
युतेकेंद्रसंस्थार्कदृष्टे॥दास्यांजातोदितिसुतगुरौरिष्फगेसौरभागेनीचेर्केद्युमदनगतेचार्कदृष्टेः
सूर्यजेन॥६॥पापालोकितयोःसितावनिजयोरस्तस्थयोःरुग्भगो श्चंद्रोदयेस्थेरवौचंद्रेखवनि
स्तगेचविकलोयद्यर्कजेनोवेशिगः॥७॥अंतःशशिन्यशुभयोर्मृगगेपतंगेश्वासक्षयप्लिहकविद्र
धिगुल्मभाजः॥शोषीपरस्परगृहांशगयोरवींद्वोःक्षेत्रेथवायुगपदेकगयोःकृशोवा॥८॥चंद्रे
श्विमध्यझषकर्किमृगाजभागेकुष्ठीसमंदरुधिरेतदवेक्षितेवा॥यातैस्त्रिकोणमलिकर्किवृषे
मृगेनकुष्ठ्यथवापसहितैरवलोकितैर्वा॥९॥निधनारिधनव्ययस्थितारविचंद्रारयमायथातथा॥बलवद्ग्रहदोषकारणैर्मनुजानांजनयंत्यनेत्रतां॥१०॥नवमायतृतीयधीयुतानचसौ
*म्याप्यरुक्चंद्रेकर्कटवृश्चिकांशकगतेपापैर्युतेत्वरुक्॥श्वित्रीस्फिधनस्थयो

म्यैरशुभा निरीक्षिताः॥ नियमाच्छ्रवणोपघाता द्रदवैकृत्यकराश्च सप्तमे॥ ११ ॥ उदयत्युडुपे सुरास्य
गे सपिशाचोऽशुभयोस्त्रिकोणयोः॥ सोपप्लवमंडले रवावुदयस्थे नयनापवर्जितः॥ १२ ॥ संसृष्टः पवने
नमंदगयुते च्छूने विलग्ने गुरो सौम्यादोऽथ निद्रोस्थिते सत्वमवने जीवे विलग्नाश्रिते॥ वहद्भूर्यसुतोदये व
निमृतैधर्मी सजलच्छूनये जाते वा सस हरस्मितनये क्षीणे व्ययेशीतगो॥ १३ ॥ राश्यंशशपोष्णकरशीतक
राभ्रे उत्येनं चापि पारशकगते रविभागगैर्वा॥ एभ्यो स्पमध्यबहुभिः क्रमशः प्रसूता ज्ञेयास्तुरम्य पगम क्रम
गर्भदासाः॥ १४ ॥ त्रिकृतद्दशनः पापैर्दृष्टे वृषाजहयोदये स्वलति रशुभक्षे नेलपेहये च्छपभेऽपिवा॥ न
बमसुतगे पापैर्दृष्टे रवावदृढेक्षणो दिनकरसुतेनैकव्याधिः कुजे विकलः पुमान्॥ १५ ॥ व्ययसुतधनु
धर्मगैरसौम्यैर्भवनसमाननिबंधनाविकल्प्याः॥ भुजगनिगडपाशभृद्दृकाणैर्बलवद्सौम्यनिरीक्षिते रामः॥
श्च तद्वत्॥ १६ ॥ पुरुषवचनोपलब्धैः स्त्रीच निशापतौ सरवितनये चक्रालोकं गतेन परिवेषगे॥ रविवि २७
मकुजैः सौम्यादृष्टैर्नभस्थलमाश्रितैर्भृतकमनुजः पूर्वोद्दिष्टैर्वराधममध्यमाः॥ १७ ॥ इतिश्रीवरा
हमिहराचार्यविरचिते बृहज्जातके अनिष्टाध्यायऽएकविंशतिः॥ २१ ॥ ४ ॥ यद्यत्फ
लं नरभवे क्षमसंगनानां तत्तद्वदेत्पतिषु वा सकलं विधेयं॥ तासां तु भर्तृमरणं निधने वपुस्तु लग्नेंदुगं शु
भगतास्तमये पतिश्च॥ १॥ युग्मेषु लग्नशशिनोः प्रकृतिस्थितास्त्री सच्छीलभूषणयुता शुभदृष्ट

योश्च॥ ओजस्थयोश्च पुरुषाकृतिशीलयुक्ता पापा तु पापयुतवीक्षितयोर्गुणोना॥ २ ॥ कन्यैव दुष्टा व्रज
तीह दास्यं साध्वी समाया कुचरित्रयुक्ता॥ भूम्यात्मजर्क्षे क्रमशोंशकेषु वक्रार्किजीवेंदुजभार्गवानां॥
॥ ३ ॥ दुष्टा पुनर्भूः सगुणा कलाज्ञा ख्याता गुणैश्चासुरपूजितर्क्षे॥ स्यात्कापटी क्लीबसमा सती च बौ
धे गुणाढ्या प्रविकीर्णकामा॥ ४ ॥ स्वच्छंदोतिघातिनी बहुगुणा शिल्पिन्यसाध्वी दुभे न्याचारा कुल
टार्कभे नृपवधूः पुंचेष्टिता गम्यगः॥ जैवे नैकगुणाल्परत्यतिगुणा विज्ञानयुक्ता सती दासी नीचरता
५८ किमैंगरता दुष्टाप्रजा स्वांशकैः॥ ५ ॥ शशिलग्नसमायुक्तैः फलं त्रिंशांशकैरिदं॥ बलाबल
विकल्पेन तयोरुक्तं विचिंतयेत्॥ दृक्कांसस्थावसितसितौ परस्परांशेशौ शौक्रे वा यदि घटराशिसंभवे
शः॥ स्त्रीभिः स्त्रीमदनविषानलं प्रदीप्तं संशांतिं नयति नराकृतिस्थिताभिः॥ ७ ॥ शून्ये कापुरुषो
बलिस्तभवने सौम्यग्रहावीक्षिते क्लीबास्ते बुधमंदयोश्चरगृहे नित्यं प्रवासागतः॥ उत्सृष्टा रविणा
कुजेन विधवा बाल्ये तराशिस्थिते कन्यैवाशुभवीक्षितेर्कतनये च्छूने जरां गच्छति॥ ८ ॥ आग्नेये
र्विधवास्तराशिसहिते मिश्रैः पुनर्भूर्भवेत् क्रूरे हीनबलेस्तगे स्वपतिना सौम्येक्षिते प्रोज्झिता॥
अन्योन्यांशगयोः सितावनिजयोरन्यप्रसक्तांगना द्यूने वा यदि शीतरश्मिसहितौ भर्तुस्तदानुज्ञ

॥बृहज्जातक
२८

या॥९॥ सौरारर्क्षे लग्नगे सेंदुशुक्रे मात्रा सार्द्धं बंधकी पापदृष्टे॥ कौजेस्तांशे सौरिणा व्याधियोनि
श्चारुश्रोणी वल्लभा सद्गुरूणां॥१०॥ वृद्धो मूर्खः सूर्यजर्क्षेंशके वा स्त्रीलोलः स्यात्क्रोधनश्चावने
ये॥ शौक्रे कांतोतीव सौभाग्ययुक्तो विद्वान्भर्ता नैपुणज्ञश्च बौधे॥११॥ मदनवशगतो मृदुश्च
चांद्रे त्रिदशगुरौ गुणवान्जितेंद्रियश्च॥ अतिमृदुरतिकर्मकृच्च शौर्ये भवति गृहेस्तमयस्थितेंशके वा॥१२॥
ईर्ष्यान्विता सुखपरा शशिशुक्रलग्ने ज्ञेंद्वोः कलासु निपुणा सुखिता गुणाढ्या॥ शुक्रज्ञयोस्तु सुभगा रुचिरा
कलाज्ञा त्रिष्वप्यनेकवसुसौख्यगुणा शुभेषु॥१३॥ क्रूरेष्टमे विधवता निधनेश्वरांशे यस्य स्थितो वयसि तस्य
समं प्रदिष्टा॥ सत्स्वर्थगेषु मरणं स्वयमेव तस्याः कन्यालिगोहरिषु चाल्पसुतत्वमिंदौ॥१४॥ सौरे मध्यबले
बलेन च हीनैः शीतांशुज्ञभृगुजैः शेषैर्वीर्यसमन्वितैः पुरुषिणी यद्योजराशीदयः॥ जीवारास्फुजिदैंदवेषु रामः॥
लिषु प्राग्लग्नराशौ समे विख्याता भुवि नैकशास्त्रनिपुणा स्त्री ब्रह्मवादिन्यपि॥१५॥ पापेस्ते नवमगतग्रहस्य २८
तुल्यां प्रव्रज्यां युवतिरुपैत्यसंशयेन॥ उद्वाहे वरणविधौ प्रदानकाले चिंतायामपि सकलं विधेयमेतत्॥१६॥
इति श्रीवराहमिहराचार्यविरचिते बृहज्जातके स्त्रीजातकाध्यायो द्वाविंशः॥ २२ ॥ ७ ॥ मृत्यु
र्मृत्युर्गृहेक्षणेन बलिभिस्तद्धातुकोपोद्भवस्तत्संयुक्तभगात्रजो बहुभवो वीर्यान्वितैर्भूरिभिः॥ अग्न्यं
म्बुशस्त्रज्वरामयकृतस्तृट्क्षुत्कृतश्चाष्टमे सूर्याद्यैर्निधने चरादिषु परस्वाध्वप्रदेशेष्वपि॥१॥

शैलाग्राभिहतस्य सूर्यकुजयोर्मृत्युः खबंधुस्थयोः कूपे मंदशशांकभूमितनयैर्बंधस्तकर्मस्थितैः॥ कन्यायां
स्वजनाद्धिमोष्णकरयोः पापग्रहैर्दृष्टयोः स्यातां यद्युभयोदयेर्कशशिनौ तोये तदा मज्जनः॥२॥ मंदे कर्क
टगे जलोदरकृतो मृत्युर्मृगांके मृगे शस्त्राग्निप्रभवः शशिन्यशुभयोर्मध्ये कुजर्क्षे स्थिते॥ कन्यायां रुधि
रोत्थशोषजनितस्तद्वत्स्थिते शीतगौ सौरर्क्षे यदि तद्वदेव हिमगौ रज्ज्वग्निपातैः कृतः॥३॥ बंधाद्धीनव
मस्थयोरशुभयोः सौम्यग्रहादृष्टयोर्द्रेष्काणैश्च सर्पपाशनिगडैः छिद्रस्थितैर्बंधनम्॥ कन्याया
मशुभान्वितेस्तमयगे चंद्रे सिते मेषगे सूर्ये लग्नगते च विद्धि मरणं स्त्रीहेतुकं मंदिरे॥४॥ शूलोद्भि
न्नतनुः सुखेवनिसुते सूर्येपि वारेंबरयमे सप्रक्षीणहिमांशुभिश्च युगपत्पापैस्त्रिकोणाद्यगैः॥ बं
धुस्थे च रवौ वियत्यवनिजे क्षीणेंदुसंवीक्षिते काष्ठेनाभिहतः प्रयाति मरणं सूर्यात्मजेनेक्षिते॥५॥
रंध्रास्पदांगहिबुकैर्लगुडाहतांगः प्रक्षीणचंद्ररुधिरार्किदिनेशयुक्तैः॥ तैरेव कर्मनवमोदयपुत्र
संस्थैर्धूमाग्निबंधनशरीरनिकुट्टनांतः॥६॥ बंधस्तकर्मसहितैः कुजमंदसूर्यैर्निर्याणमायुध
शिखिक्षितिपालकोपात्॥ सौरेंदुभूमितनयैः स्वसुखास्पदस्थैर्ज्ञेयः क्षतक्रिमिकृतश्च

बृहज्जातक
२९

रिमपातः ॥ ७ ॥ स्वस्थेर्के वनिजेरसातलगते यानप्रपाताद्वधो यंत्रोत्पीडनजः कुजेस्तमयगे सौरेंदुिनाभ्यु
कृमे ॥ विण्मध्येरुधिरार्किशीतकिरणैः शूलकालसौरक्षगैर्यातेचोगळिनेंदुसूर्यरुधिरैर्योभास्तवध्याकृयात
॥ ८ ॥ वीर्यान्वितवक्रवीक्षितेक्षीणेंदौ निधनस्थितेर्केजेगुह्योद्भवरोगपीड्यामृत्युः स्यात्कृमिशस्त्रदा
हजः ॥ ९ ॥ अस्तेरवौसरुधिरे निधनेर्कपुत्रे क्षीणेरसातलगते हिमगौखगोनः ॥ लग्नात्मजाष्टमतप
स्विनभौममंदचंद्रैस्तुशैलशिखराशनिकुड्यपातः ॥ १० ॥ द्वाविंशः कथितस्तु कारणंद्रेक्काणो नि
धनस्यसूरिभिः ॥ तस्याधिपतिर्भवोपिवा निर्याणंस्वगुणैः प्रयच्छति ॥ ११ ॥ होरानवांशकप्रयुक्त
समानभूमौ योगेक्षणादिभिरतः परिकल्प्यमेतत् ॥ मोहस्तुमृत्युसमयेनुदितांशतुल्यः स्वेशेक्षि रामः ॥
तेद्विगुणितस्त्रिगुणः शुभैश्च ॥ १२ ॥ दहनजलविमिश्रैर्भस्मसंक्लेदशोषैर्निधनभवनसंस्थैर्व्या २९
लवर्गैर्विकल्प्यः ॥ इतिशवपरिणामश्चिंतनीयो यथोक्तः पृथुविरचितशास्त्राद्गत्यनूकादि
चिंत्यं ॥ १३ ॥ गुरुरुडुपतिशुक्रौसूर्यभौमौयमज्ञौविबुधपितृतिरश्चोनारकीयांश्चकुर्युः ॥
दिनकरशशिवीर्याधिष्ठितात्र्यंशनाथात्प्रवरसमनिकृष्टास्तुंगह्रासादनूके ॥ १४ ॥ गतिरपि
रिपुरंध्रत्र्यंशपोस्तस्थितोवागुरुरथरिपुकेंद्रछिद्रगः स्वोच्चसंस्थः ॥ उदयतिभवनेंत्ये सौम्य

भागेचमोक्षोभवतियदिबलेनप्रोज्झितास्तत्रशेषाः ॥ १५ ॥ इतिश्रीवराहमिहराचार्यविरचितेबृह
ज्जातकेनिर्याणाध्यायस्त्रयोविंशः ॥ २३ ॥ छ ॥ आधानजन्मापरिबोधकालेसंप्रच्छतोजन्म
वदेद्विलग्नात् ॥ पूर्वापरार्धेभवनस्यविद्यादर्केनावुदग्दक्षिणगेप्रसूतिं ॥ १ ॥ लग्नत्रिकोणेषुगुरुस्त्रिभा
गैर्विकल्प्यवर्षाणिवयोनुमानात् ॥ ग्रीष्मोर्कलग्नेकथितास्तुशेषैरन्यायनर्तोवृतुरर्कचारात् ॥ २ ॥ चंद्र
ज्ञजीवापरिवर्तनीयाः शुक्रारमंदैरयनेविलोमे ॥ द्रेष्काणभागेप्रथमेतुपूर्वोमासोनुपाताच्च
तिथिर्विकल्प्या ॥ ३ ॥ अत्रापिहोरापटवोद्विजेंद्राः सूर्यांशतुल्यांतिथिमुद्दिशंति ॥ रा
त्रिद्युसंज्ञेषुविलोमजन्मभागैश्चवेलाक्रमशोविकल्प्याः ॥ ४ ॥ केचित्शशांकाध्युषि
तान्नवांशाच्छुक्लांत्यसंज्ञंकथयंतिमासं ॥ लग्नत्रिकोणोत्तमवीर्ययुक्तंसंप्रोच्यतेगाल
ग भनादि‒‒ ॥ ५ ॥ यावान्गतः शीतकरोविलग्नाच्चंद्राद्वदेत्तावतिजन्मराशिः ॥ मी
नोदयेमीनयुगंप्रदिष्टंभक्ष्याह्वनाकाररुतैश्चचिंत्यं ॥ ६ ॥ होरानवांशप्रतिमंवि
लग्नंलग्नाद्रवीर्यावतिचद्रेक्काणे ॥ तस्माद्वदेत्तावतिवाविलग्नंप्रष्टुःप्रसूता

बृ॰जा॰ वितिशास्त्रमाह॥ ७ ॥जन्मादिशेछयेवीर्यगेवाछायांगुळेभ्नेके शुद्धेवशिष्टं॥आ
३९ सीनसुप्तोत्थितविष्टाभंजायासुखाद्गेदयगंत्रदिष्टं ॥ ८ ॥गोसिंहोजिनमा
ष्टमौक्रियतुलेकन्यामृगौचक्रमात्संवर्ग्योदशकाष्टसप्तविषयैःशेषाःस्व
संख्यागुणाः॥जीवारास्फुजिदैद्ववां[illegible]नथमवछेषाग्रहाःसौम्यवृश्च
ःशीनानियतोविधियुहयुलौकार्यापलहतगुणाः॥९॥सप्ताहतंत्रिप
नभाजितशेषमृक्षंवाथवानवविशोध्यनवाथवास्मात्॥एवंक न५
कत्रसलग्नात्मजशत्रुभेभ्यःप्रष्टुर्वदेदुदयराशिवशेनतेषां॥१०॥व रामः॥
र्षर्तुमासतिथयोद्युनिशंह्युडूनिवेलोदयर्क्षनवभागविकल्पनास्युः॥
भूयोदशाद्विगुणिताद्युविकल्पभक्तावर्षादयोनवकदानवशोधना ३९
भ्यां॥११॥विज्ञेयादशकेष्वब्दाऋतुमासास्तथैवच॥अष्टकेष्वपिमा
सार्द्धास्तिथयश्चतथास्मृताः॥१२॥दिवारात्रिप्रसूतिंचनक्षत्रानयनं

तथा॥सप्तकेष्वपिवर्षेषुनित्यमेवोपलक्षयेत्॥१३॥वेलामथविलग्नंचहोरांशम्
कमेवच॥पंचकेषुविजानीयान्नष्टजातकसिद्धये॥१४॥संस्कारनाममात्रा
द्विगुणाछायांगुलैःसमायुक्ता॥शेषत्रिनवकभक्तंनक्षत्रंतद्धनिष्ठादि॥१५॥द्वि२
त्रि३चतुर्दश१४शशातिथि१५सप्तत्रिगुण२१नवाष्टकचेंद्राद्याः॥पंचदशघ्नास्तद्वि
युक्ताश्चिनाभंधनिष्ठादि॥१६॥इतिनष्टजातकमिदंबहुप्रकारंमयाविनिर्दिष्टं॥
ग्राह्यपातःसच्छिष्यैःपरीक्ष्ययत्साद्यथाभवति॥१७॥इतिश्रीवराहमिहराचार्यवि
रचितेबृहज्जातकेनष्टजातकाध्यायश्चतुर्विंशतितमः॥२४॥ ॥
कट्यांसितवस्त्रवेष्टितःकृष्णःशक्तइवाभिरक्षितुं॥रौद्रःपरशुंसमुद्यतंघत्तेरक्तविलो
चनंपुमान्॥१॥रक्तांबराभूषणभक्ष्यचिंताकुंभाकृतिर्वाजिमुखोनृषार्तो॥स्त्र्येकेन
पादेनचमेषमध्येद्रेष्काणरूपःयवनोपदिष्टं॥२॥क्रूरःकलाज्ञःकपिलःक्रियार्थी
भग्नव्रतोभ्युद्यतदंडहस्तः॥रक्तानिवस्त्राणिबिभर्तिचंडोमेषेतृतीयःकथितस्त्रिभागः॥३॥

बृ०जा०
३१

कुंचितलूनकुचाघटदेहादग्धपटानृषिताशनचिंता ।। आभरणान्यभिवांछिनि नारीरूपमि
दं वृषभे प्रथमस्य ।। ४ ।। क्षेत्रधान्यगृहधेनुकलाज्ञो लांगले सशकटे कुशलश्च ।। स्कंधमु
द्वहति गोपतितुल्यमुखस्तुपरोजवक्त्रो मलवाससा ।। ५ ।। द्विपसमकायः पांडुरदंष्ट्रः शरभस
मांघ्रिः पिंगलमूर्तिः ।। अविमृगलोमाच्याकुलचित्तो वृषभवनस्य वनगतोयं ।। ६ ।। सू
च्याश्रयं समभिवांछित कर्मनारी रूपान्विताभरणकार्यकृतादरा च ।। हीनप्रजोच्छ्रितभु
जर्तुमती त्रिभागमाद्यं तृतीयभवनस्य वदंति तज्ज्ञाः ।। ७ ।। उद्यानसंस्थः कवची धनु
ष्मान् शूरोस्त्रधारी गरुडाननश्च ।। क्रीडात्मजालंकरणार्थचिंतां करोति मध्ये मिथु
नस्य राशेः ।। ८ ।। भूषितो वरुणवद्बहुरत्नो बद्धतूणकवचः सधनुष्कः ।। नृत्तवादि — रामः ।।
तकलासु च विद्वान् काव्यकृन्मिथुनराश्यवसाने ।। ९ ।। पत्रमूलफलभृद्द्विपकायः — ३३
कानने मलयगः शरभांघ्रिः ।। क्रोडतुल्यवदनो हयकंठः कर्कटे प्रथमरूपमुपैति
।। १० ।। पद्मार्चिता मूर्ध्नि भुजंगयुक्ता स्त्री कर्कशारण्यगता विरौति ।। शाखापलाश

स्य समाश्रिता च मध्ये स्थिता कर्कटकस्य राशेः ।। ११ ।। भार्याभरणार्थमर्णवं नौस्थो गच्छति स
र्पवेष्टितः ।। हैमैश्च युतो विभूषणैश्चिपिटास्योंत्यगतश्च कर्कटे ।। १२ ।। शाल्मलेरुपरि गृध्र
जंबुकौ श्वा नरश्च मलिनांबरान्वितः ।। रौति मातृपितृविप्रयोजितः सिंहरूपमिदमाद्यमुच्य
ते ।। १३ ।। हयाकृतिः पांडुरमाल्यशेखरो बिभर्ति कृष्णाजिनकंबलं नरः ।। दुरासदः सिंह
वदात्तकार्मुको नतायनासो मृगराजमध्यः ।। १४ ।। ऋक्षाननो वानरतुल्यचेष्टो बिभर्ति दं
डं फलमामिषं च ।। कूर्ची मनुष्यः कुटिलैश्च केशैर्मृगेश्वरस्यांत्यगतस्त्रिभागः ।। १५ ।। पु
ष्पप्रपूर्णेन घटेन कन्या मलप्रदिग्धांबरसंवृतांगी ।। वस्त्रार्थसंयोगमभीप्समाना गुरोः कुलं
वांछति कन्यकाद्यः ।। १६ ।। पुरुषः प्रगृह्य लेखनीं श्यामो वस्त्रशिरा व्ययायकृत् ।। वि
पुलं च बिभर्ति कार्मुकं रोमव्याप्ततनुश्च मध्यमः ।। १७ ।। गौरी सुधौताग्रदुकूलगुप्ता स
मुच्छ्रिता कुंभकटच्छुहस्ता ।। देवालयं स्त्री प्रयता प्रवृत्ता वदंति कन्यांत्यगतस्त्रिभागः ।। १८ ।।
वीथ्यंतरापणगतः पुरुषस्तुलावानुन्मानमानकुशलः प्रतिमानहस्तः ।। भांडं विचिंत
यति तस्य च मूल्यमेतद्रूपं वदंति यवनाः प्रथमं तुलायाः ।। १९ ।। कलशं परिगृह्य वि

निः पतितुं समभीप्सति गृध्रमुखः पुरुषः॥ क्षुधितस्तृषितश्च कलत्रसुतान्मनसैति तुलाधर
मध्यगतः॥ २० ॥ विभीषयन्तिष्ठति रत्नचित्रितो वने मृगार्त्तो कनकव्रणवर्णभृत्॥ फलामिषं वा
नररूपभृन्नरस्तुलावसाने यदवेनरूहाहतः॥ २१ ॥ वस्त्रैर्विहीनाभरणैश्च नारी महासमुद्रा
त्समुपैति कूलं॥ स्थानच्युता सर्पनिबद्धपादा मनोरमा वृश्चिकराशिपूर्वे॥ २२ ॥ स्थानसुखा
न्यभिवांछित नरो भर्तुकृते भुजगावृतदेहा॥ कच्छपकुंभसमानशरीरा वृश्चिकमध्यमरूपमुपै
ति॥ २३ ॥ पृथुलचिपिटकूर्मतुल्यवक्त्रः श्वमृगवराहसृगालभीषकारी॥ अवति च मल
याकरप्रदेशं मृगपतिरंत्यगतश्च वृश्चिकस्य॥ २४ ॥ मनुष्यवक्त्रोऽश्वसमानकायो धनुर्वि
गृह्यायतमाश्रमस्थः॥ क्रतूपयोज्यानि तपस्विनश्च रक्षत्यपूर्वो धनुषस्त्रिभागः॥ २५ ॥ म रामः॥
नोरमा चंपकहेमवर्णा भद्रासने तिष्ठति मध्यरूपा॥ समुद्ररत्नानि विघट्टयंती मध्यत्रि ३२
भागो धनुषः प्रदिष्टः॥ २६ ॥ कूर्चीनरो हाटककुंभकायो वरासने दंडधरो निषस्मः॥ कौ
शेयकान्युद्वहते जिनं च तृतीयरूपं नवमस्य राशेः॥ २७ ॥ रोमचितो मकरोपमदंष्ट्रः सू
करकायसमानशरीरः॥ योक्त्रकजालकबंधनधारी रौद्रमुखो मकरप्रथमस्तु॥ २८ ॥ का

लाखमिज्ञा कलहरापताक्षी श्यामा विचित्राणि च मार्गमाणा विभूषणालंकृतलोहकर्णा योषा प्रदि
ष्टा मकरस्य मध्ये॥ २९ ॥ किन्नरोपमतनुः सकंबलस्तूणचापकवचैः समन्वितः॥ कुंभमुद्वहति र
त्नचित्रितं स्कंधगं मकरराशिपश्चिमः॥ ३० ॥ स्नेहमद्यजलभोजनागमव्याकुलीकृतमनाः
सकंबलः॥ कोशकारवसनोऽजिनान्वितो गृध्रतुल्यवदनो घटादिगः॥ ३१ ॥ दग्धे शकटे सश
ल्मलो लोहान्याहरते गनावने॥ मलिनेन पटेन संवृता भांडैर्मूर्ध्निगतैश्च मध्यमः॥ ३२ ॥ श्या
मः सरोमश्रवणः किरीटी त्वक्पत्रनिर्यासफलैर्बिभर्ति॥ भांडानि लोहव्यतिमिश्रितानि सं
चारयत्यंत्यगतो घटस्य॥ ३३ ॥ स्रुग्भांडमुक्तामणिशंखमिश्रैर्व्याक्षिप्तहस्तः सविभूष
णश्च॥ भार्याविभूषार्थमपांनिधानं नवाप्लवेना प्लवते झषस्य॥ ३४ ॥ अत्युच्छ्रितध्वजपताक क्रि ८
मुपैति पोतं कूलं प्रयाति जलधेः परिवारयुक्ता॥ वर्णेन चंपकमुखा प्रमदा त्रिभागो मीनस्य चै
नि ४ पकथितो मुनिभिर्द्वितीयः॥ श्वभ्रांतिके सर्पनिवेष्टितांगो वस्त्रैर्विहीनः पुरुषस्त्वटव्यां॥ चौरा
नलव्याकुलितांतरात्मा विक्रोशतेऽत्योपगतो झषस्य॥ ३६ ॥ इति श्रीवराहमिहराचार्य
विरचिते बृहज्जातके द्रेष्काणरूपाध्यायः पंचविंशतितमः॥ २५ ॥ छ ॥ ७०
राशित्रिभेदोयहयो निमित्तो वियोनिजन्माथ निषेककालः॥ जन्माथ सद्योमरणं तथायु

स्१२

शाविपाकोष्टकवर्गसंज्ञः॥१॥कर्माजीवोराजयोगाःखयोगाश्चांद्रायोगाद्विग्रहाद्याश्चयो-
गाः॥प्रव्रज्याथोराशिशीलानिदृष्टिर्भावस्तस्मादाश्रयोथप्रकीर्णः॥२॥नेष्टायोगाजातकं
कामिनीनांनिर्याणंस्यान्नष्टजन्मद्रेकाणाः॥अध्यायानांविंशतिःपंचयुक्ताजन्मन्येतद्यात्रिकंचा-
भिधास्ये॥३॥प्रश्नास्तिथिर्भंदिवसःक्षणश्चचंद्रोविलग्नंत्वथलग्नभेदः॥शुद्धिर्ग्रहाणाम
थचापवादोविमिश्रकाख्यंतनुवेपनंच॥४॥अनःपरंगुप्तकस्नानंस्यात्लग्नंततनःस्नानविधिः
प्रदिष्टःयज्ञोग्रहाणामथनिर्गमश्चक्रमाच्चोरिष्टःशकुनोपदेशः॥५॥विवाहकालःकरणंग्र
हाणांप्रोक्तंपृथक्तद्विपुलाचशाखा॥स्कंधैस्त्रिभिर्ज्योतिषसंग्रहोयंमयाकृतोदैववि ॥रामः॥
दांहिताय॥६॥पृथुविरचितमन्यैःशास्त्रमेतत्समस्तंतदनुलघुमयेदंतत्प्रदेशार्थमेव॥कृत ॥३२॥
मिहिरसमर्थंधीविषाणामक्लेशमय्ययदिह उरुकेराज्ञानेःहम्यतांतन्॥७॥ग्रंथस्ययत्स
मरेतोस्यविनाशमेतिलेख्याद्बहुश्रुतमुखाधिगमक्रमेण॥यद्वाभयाकुशलमस्त्यमिहाकृत्ने
वाकार्यंतत्रविद्वुपापरिशोध्यरागं॥८॥दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसाद
मतिनेदं॥शास्त्रमुपसंगृहीतंनमोस्तुपूर्वप्रणेतृभ्यः॥९॥इतिश्रीवराहमिहिराचार्यविरचि
तेबृहज्जातकेउपसंहाराध्यायःपरिसंख्या॥२८॥पट्टेदमानभट्टशाके१७४८संवत्मलएकनाथ
मिश्रानभस्यातकृष्णपक्षेनुलिलितंविनायक॥ २० २१८ २१ २८ १२ ३४ २३ १८ ४ २० १२ २९ ४
४० ९ ११ १० ९ ५ ७ १६ १९ १७ ३ २ २१॥ ॥ ७ ॥ ॥४८०॥श्लोकसंख्या॥ लक्ष्मणेनार्थविचिन्तितं